डॉ० सूरं श्रीनिवासुलु-विरचिता

अभिनव - चतुर्भाणी

सम्पादिका

डॉ० यम्. के. सुनीता

डॉ॰ सूरं श्रीनिवासुलु-विरचिता

अभिनव-चतुर्भाणी

सम्पादिका

डॉ॰ यम्॰ के॰ सुनीता

प्रकाशिका

लोकभाषा-प्रचार-समितिः

पुरी - ७५२००१

Abhinava çaturbhāṇī - Dr. Suram Srinivasulu viraçitā

Editor - **M.K.Suneetha**

First Edition: January 2025

Publishied by: Loka Bhasha Prachara Samiti

अन्तर्जालमाध्यमेन प्राप्तिस्थानम् -

www.saraswatam.com

चलदूरभाषः - 7669695222

+91-7669695222

Free Catalogue

For Copies:

M.K. Suneetha

Center of Distance Education,

National Sanskrit University

Tirupati – 517507

Ph: 7013881365

ISBN: 978-81-955641-9-4

Rs. 125/-

DTP: Vittubabu, Hyderabad. Ph.8555082034

Printed: New Edge Press, Patna

पृष्ठसज्जा एवं प्रकाशनसहयोगः -

सारस्वतम् पब्लिकेशन, दिल्ली

चलदूरभाषः - 7669697444

विषयसूचिका

आमुखम्

स्वानुभूतस्य वा परानुभूतस्य वा धूर्तचरितस्य निपुणेन पण्डितेन च विटेन वर्णनं भाण इति आलङ्कारिकाः। अङ्कप्रहसनभाणेषु स्त्रीबालमूर्खाः अधिकारिणः इति अभिनवगुप्तः अभिप्रैति। बाहुल्येन पृथग्जन व्युत्पत्त्युपयोगिरूपकमिदमिति हेमचन्द्रः प्रकटयन्नपि, अवञ्चनार्थं राजपुत्रादीनामपि शम्भलीवृत्तान्तः ज्ञेय एव इति कारणं निर्दिश्य भाणस्य प्राज्यत्वं साधयति। सर्वेप्येते अभिप्रायाः धूर्तचरितत्वं निमित्तीकृत्य प्रादुर्भूताः। धूर्तचरितस्य एव अपनयने...?

आधुनिकैः कैश्चित् कविभिः सः प्रयत्नः आरब्धः। अवशिष्टानि भाणलक्षणानि एकनटत्व, बहुपात्रत्व, आकाशभाषितबाहुल्यादीनि यानि भाणनिर्माणे निर्मातुःअत्यन्तम् उपयोगीनि भवन्ति स्वाभिप्रायाविष्करणार्थम् समादृत्य तानि भाण निर्माणं कृतम्। सामाजिकाः बह्व्याः समस्याः कविभिः परिशीलनीयाः, विश्लेषणीयाः, परिष्करणीयाश्च सन्ति वर्तमानकाले। तदर्थं धूर्तचरितत्वं, तदनुबन्धिलक्षणानां च परिहारे भाणः अत्यन्तम् उपकरोतीति धिया आधुनिकसंस्कृतविद्वद्भिः भाणेतिवृत्तविषये नूतनदृष्टिः प्रसारिता।

तेनैव पथा गन्तुकामोऽहमपि गुरुवररञ्जनभाणं, कविजनमण्डनभाणं, नटसमागम - भाणं च निर्मितवान्। धूर्तानुभवभाणस्तु कश्चन प्रयोगः, कापि सम्भावना। अस्मिन् ऋग्वेद दशममण्डलान्तर्गतम् अक्षसूक्तमेव यथातथं यथाक्रमञ्च उपयुज्य नान्दी प्रस्तावना भरतवाक्यादिकानि सर्वाण्यपि भाणलक्षणानि समुपकल्प्य मदीयैः वचनैः ऋचः अनुबद्धाः। तिथियज्ञक्रियादिसमयेषु नाटकप्रदर्शनमासीदिति भरताभिप्रायमपि मनसि निधाय तस्य कान्तासम्मितोपदेशयुक्तत्वम् उपाकल्पि।

एते भाणाः यथाक्रमं संवित् - गैर्वाणी - संवित् - संस्कृत सम्मेलन पत्रिकासु प्रकटिताः। तत्सम्पादकेभ्यः नमांसि भूयांसि।

साम्प्रतम् एतानि सर्वाणि डा. सुनीतया समुद्धृत्य सम्पादितानि। अहमधमर्णः तदीय सौहार्दाय।

सूरं श्रीनिवासुलु

प्रस्तावना

चतुर्भिः प्राचीनैः भाणैः संवलिता चतुर्भाणी सर्वप्रथमतया मानवल्लि रामकृष्णकविभिः क्रीस्तोः विंशतितमे शताब्दे (1922) प्रकटिता स्वीयपरिष्करणेन। ते च वररुचेः उभयाभिसारिका, शूद्रकस्य पद्मप्राभृतकम्, ईश्वरदत्तस्य धूर्तविटसंवादः, श्यामलिकस्य पादताडितकञ्च। पद्मप्राभृतकस्य अन्ते कश्चनश्लोकः भाणसाहित्य वैशिष्ट्य प्रतिपादकः दृश्यते इति मानवल्लि रामकृष्णकविभिः दर्शितः। स च –

वररुचि रीश्वरदत्तश्श्यामिलकश्शूद्रकश्च चत्वारः।
एते भाणान्बभणुः का शक्तिः कालिदासस्य ॥

अस्मिन् श्लोके कालिदासस्यापि एतादृश भाणरचना शक्तिः नास्तीति कथितम्। वस्तुतस्तु कालिदासप्रतिभायाः न्यूनीकरणापेक्षया तेषां चतुर्णां भाणाना मुदात्तता-परिकल्पनस्यैव अत्र प्राधान्यम्। ते चत्वारः अपि भाणाः वस्तु तन्निर्वहणविध्योः प्रशंसनीयामेव सरणिं स्वीकृतवन्तः। रसस्य श्रृङ्गारतदाभासपदत्वेपि तन्निर्वहणं समाजसन्निहितं सद्भावुक मनांसि आवर्जयति। श्रृङ्गार रसस्य कामपुरुषार्थस्य च स्पष्टीकरणे शास्त्रीयता परिकल्पने च उदात्तकवितासाहाय्यं स्वीकृत्य एते चत्वारः भाणाः रमणीयतायाः निधानाः अभवन्।

अधुना अभिनवा चतुर्भाणी आविष्क्रियमाणा अस्ति। प्राचीनाः चत्वारः भाणाः भिन्नकर्तृकाः। अत्र पुनः चत्वारः अपि भाणाः एककर्तृकाः। यश्च नाम्ना डा.सूरं श्रीनिवासुलु। भाणसाहित्यविषये कृतभूरिप्रिश्रमः अधिगतकीर्तिश्च अयं पण्डितः आधुनिको कविश्च। त्रीण् भाणान् विरचय्य एकं विनूतनमार्गे निर्माय च प्रकटीकृतवान्। अत्रस्थाः चत्वारः भाणाः –

1. धूर्तानुभवभाणः

2. गुरुवररञ्जनभाणः

3. कविजनमण्डनभाणः

4. नटसमागमभाणः

धूर्तानुभवभाणः

अयं कश्चन विलक्षणभाणः। ऋग्वेद दशममण्डलान्तर्गतम् अक्षसूक्तम् आधारीकृत्य निर्मितोऽयं भाणः। अक्षसूक्तस्य यज्ञाङ्गत्वेन विनियोगःकदापिआसीद्वानवेतिनिर्णेतुमपिनशक्यते।रूपकाविर्भावप्रस्थाने वैदिकसूक्तानि आधारीकृत्य संस्कृतरूपकोत्पत्तिरिति कश्चन वादः। तत्रस्थ संवादसूक्तानि रूपकोत्पत्तिमूलभूतानि इति प्रसिद्धोऽयम् अभिप्रायः। डा.सूरं श्रीनिवासुलु महोदयः अक्षसूक्तस्यापि रूपकाविर्भाव मूलभूतत्वं सम्भाव्य अक्षसूक्तं एकपात्रप्रधानेन भाणेन तुल्यं प्रतिभाति इति निरूपयितुं धूर्तानुभवभाणं चकार। नाट्यशास्त्रे कश्चन श्लोकः

प्रकाशमेतदिच्छामो भूतले संप्रकीर्तितम्।
तिथियज्ञक्रियास्येवं यथास्यान्मङ्गलं शुभम्॥

ना. शा. 36 / 58

अत्र तिथियज्ञक्रियासु प्रकटनार्थं नटनार्थं वा नहुषेण नाट्यमभिलषितमिति प्रत्यपादि। तिथियज्ञसन्दर्भे विश्रान्तिकाले समागतान् जनान् उद्दिश्य जीवनधर्म- बोधनार्थम् उपयुक्तेषु सूक्तेषु इदम् अन्यतमं स्यादिति रचयितुः अभिप्रायः। अतः अक्षसूक्तस्थाः रुचः तस्मिन्नेवक्रमे संस्थाप्य, मध्ये मध्ये भाणस्वरूपोचितानि श्रृङ्गाराभासप्रधानानि वचनानि विरचय्य, प्रकटितोऽयं भाणः। अत्राऽयं विशेषः। नान्दी प्रस्तावना भरतवाक्यान्यपि यथासूक्तमेव संदर्शितानि क्रमम् अपरित्यज्यैव। एतन्निर्माणे कवेः प्रतिभा, सम्प्रदाय समादरणं, सामाजिकदृष्टिः, आधुनिकताप्रीतिश्च सन्दृश्यन्ते। अक्षसूक्ते वक्ता कितवः भाणे अत्र नायकः। मध्ये वचनान्यपि तत्तत् ऋक्गत भावानुसारं

कल्पितानि, किन्तु अकल्पितानि इव प्रतिभान्ति। विलक्षणः अयं प्रयोगः सफल एव।

गुरुवररञ्जनभाणः

भारतीयशैष्योपाध्यायिका विलक्षणा विशिष्टा च।

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै।
ओं शान्तिः शान्तिः शान्तिः।

इति वैदिकानुवाकः गुरुशिष्य सम्बन्धं स्पष्टयति। वेदाध्ययनानन्तरम् अध्यापकेन शिष्यं प्रति सन्दिष्टं वेदानुशासनम् –'वेदमनूच्याचार्योऽन्तेवासिन-मनुशास्ति – सत्यं वद। धर्मं चर। स्वाध्यायान्माप्रमदः। आचार्याय प्रियं धन माहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकगं् सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि। ये के चास्मच्छ्रेयागं् सो ब्राह्मणाः। तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणास्सम्मर्शिनः। युक्ताऽयुक्ताः। अलूक्षा धर्मकामास्युः। यथा ते वर्तेरन्। तथा तेषु वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणा सम्मर्शिनः। युक्ताऽयुक्ताः। अलूक्षा धर्मकामा स्युः। यथा तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमचैतदुपास्यम्।' इति तैत्तरीयोपनिषदि वेदानुशासनं गुरुसमाजयोः मध्यगतं सम्बन्धं स्पुटीकरोति।

पुराणेतिहास काव्येषु बहवः गुरवः तत्तत्कर्मणि निष्णाताः शिष्यवत्सलाः शिष्यकठिनाश्च दृश्यन्ते। द्रोणादयः अध्यापयन्त एव राजसभास्वपि स्थानमलभन्त। वरतन्त्वादयः आश्रमस्थाः एव शिष्यबुद्धिं निर्मितवन्तः। स्वयं भगवान् श्रीकृष्णः अपि सान्दीपनेः आश्रमे तत्सन्निधौ शिष्य एव इत्ययं विषय एव गुरुप्राधान्यं द्रढयति। आचार्याः प्रकृतिसहकारेण, प्रभुसहकारेण, शिष्यसहकारेण च जीवितं सुखं यापयन्ति स्म। तथापि तत्प्राप्तेः पूर्वं द्रोणादयः अपि दारिद्र्य मनुभवन्तः पुत्रान् क्षीरं पाययितुमपि अशक्ताः अत एव मित्रपराभूताः आसन्। 'पञ्चमेऽहनि षष्ठे वा शाकं पचति मे गृहे' इति प्राचीनमेव वचनं तेषां दारिद्र्यं दर्शयति। विभिन्नैः कारणैः सम्पन्ना अपि तेषु आसन् केचित्। किन्तु बहुशः ते अनर्थपरायणाः एव।

एषा स्थितिः मध्यकाले आधुनिके काले अपि आसीत् अस्ति च। शैष्योपाध्यायिकायाम् अध्ययनानन्तरं शिष्याः गुरुदक्षिणां ददति स्म। अर्जुनेन द्रुपद-मथनं, कौत्सेन रघोः सकाशात् चतुर्दशकोटिसहस्रनाणकानि आदाय वरतन्तवे समर्पणं च एतादृश गुरुदक्षिणा समर्पणमेव। गच्छति काले आदावेव धनसमर्पणं पश्चात् च अध्ययनम् इत्येषा व्यवस्था समाजेन समादृता। तथापि उपाध्यायाः अध्यापकाः वा अलब्धगौरवाः अपर्याप्तधनाश्च क्लेशान् अनुभवन्ति स्म।न सर्वत्र, न सर्वे, किन्तु स्थितिः दृश्यमाना एव। उपाध्यायेष्वपि केचित् स्व स्व वृत्तौ यजमान्यनुगुणं सुखं वा क्लिष्टं वा जीवन्ति। एतत् सर्वं मनसि निधाय डा. सूरं श्रीनिवासुलु महोदयेन गुरुवर-रञ्जनभाणः विरचितः।उपाध्यायेष्वपि न सर्वे निर्दुष्टाः। कार्यकरणविषये अयमप्यंशः रचयितुः मनसि अस्त्येव। भाणे प्रस्तुत एव। आचार्य के.वि.रामकृष्णमाचार्यः गुरुवरञ्जनभाणं परामृश्य स्वीये भाणवाङ्मयचरिते इत्थं वदति। 'अन्योप्यस्ति वर्गः उपाध्यायेषु यश्च विद्यालये स्वीयमध्यापनं न निर्वहति , किन्तु गृहे धनं स्वीकृत्य विद्यार्थिनः अध्यापयति। केचन अध्यापकाः केवलमधिकारिणां सेवायामेव निरताः तत्स्तोत्रपराः भवन्ति। एवम् अध्यापकेषु ये दोषाः तेऽपि बहिर्गमिताः,

तथा अध्यापकानां दु:स्थितिरपि सम्यगत्र प्रकाशिता। अतश्च अयं भाणः गुरुजनेभ्यः समर्पित इति गुरुवररञ्जन एव।'

गुरुवररञ्जनभाणे कृपालयः नायकः।सः कालकरवालच्छिन्नहृदयः। सः क्लिन्नः सूत्रधारप्रस्तुतं कालप्रभावं विनिन्दन् , इत्थं वदन् प्रतिशति –

जीवत्सु साधुवर्येषु त्यागरूपेषु धार्मिकैः।
सौख्यैस्संसेव्यमाननां ते हि नो दिवसा गताः॥
अन्नार्थिनां न चास्त्यन्नमार्तानां नहि रक्षणम्।
धर्मार्तानां न वा धर्मः विधे! कालं विकल्पय॥

अनयोः प्रथमःश्लोकः भवभूतिश्लोकस्य

जीवत्सु तातपादेषु नूतने दारसङ्ग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥

इत्यस्य अनुकरणं, न तु व्यङ्ग्यया गत्या, किन्तु विषादात्मिकया स्मृत्या। अतः सः पाठशालां गत्वा तत्र प्रधानोपाध्यायैस्सह संभाष्य ततः पण्यवीथिकां गत्वा आपणे तत् स्वामिनः गौरवं पराभवं च सम्प्राप्य, कर्तव्यविमुखैः सहचर उपाध्यायैस्सह मिलित्वा, तैः इतरैस्सह विरुध्य, अन्ते गुरुपूजादिनोत्सवकार्यक्रमे स्थानं स्वीकृत्य निर्गच्छति। उपाध्यायवर्गे कर्तव्यवैमुख्यं कर्तव्यपलायनं वा जातिविनाश हेतुरिति असङ्गत्यलङ्काररूपेण कविरयं द्रढीकरोति।

कार्यकारणयोः भिन्नदेशत्वे न हि असङ्गतिः।
गुरोर्देहे राजयक्ष्म मृतिर्जातेर्निरन्तरम्॥ इति

वस्तुतः कार्यकारणयोः भिन्नदेशत्वे असङ्गतिः अलङ्कारः।कविरत्र चमत्करोति कार्यकारणयोः भिन्नदेशत्वेपि असङ्गतिः न भवति इति। यथा गुरौ अनारोग्यं, मरणं जातेः इति कारणं गुरौ, कार्यं जातौ। इदम् असङ्गतं सत् उपाध्यायवर्गे अवश्यं जागरूकता स्यादिति ध्वनयति।

कविजनमण्डनभाणः

नाम्नायं भाणः कविजनमण्डनम्। वस्तुतस्तु कविकल्पनायाः अधिक्षेपणे नितरामासक्तमिदं रूपकम्। कवयः क्रान्तदर्शिनः इति महतां वचनम्। "कविर्मनीषी परिभूः स्वयम्भूः" इत्यादिकस्य उपनिषद्वचनस्य व्याख्यानावसरे कविशब्दस्य क्रान्तदर्शित्वार्थः शङ्कराचार्यैः सूचितः। आदिकवेः वाल्मीकेः शोकः श्लोकत्वमागतः। व्यासस्य वाणी बहुविस्तरा। तथापि 'न च कश्चित् श्रृणोति माम्' इति तस्यापि विरक्ति वचनम्। कालिदासादयः द्वित्राः पञ्चषा वा महाकवित्वेन कीर्तिताः आनन्दवर्धनेन। इत्थं समाजश्रेयोऽभिलाषिणस्सन्तः प्राचीनाः कवयः काव्यानि व्यरचयन्। यद्यपि केचित् कवयः राज्ञाम् आश्रये आसन् तथापि तेषां तदाश्रयलक्ष्यं जीविका निर्वर्तनपरमेव, नान्यदासीत्।

संसकृतरूपकवाङ्मयविषये मध्याकालादारभ्य तत्कतृणां दृष्टिः समाजगतायां कूटप्रवृत्तौ अपि पपात। तदधिक्षेपणपराः ते स्वीयां समाजश्रेयोनिबद्धां प्रवृत्तिमपि दर्शितवन्तः।वत्सराजः हास्यचूडामणिप्रहसने कुहनाकार्तान्तिकानां स्वरूपमेवं निर्दिशति। यथा –

किं वाग्भिः निकषो हि नः फलमिति स्याद्गूढगर्वग्रहः
प्रश्नेष्वाविलमुत्तरं विरचयेन्न व्याहारे न्निर्णयम्।
सिद्धं कार्यमवेक्ष्य निश्चितमिदं पूर्वं मयासीदिति
स्फारं स्फारमुदीरयेदुपचरेत् कञ्चिन्मृषा साक्षिणम्॥

तादृशी कुहनाप्रवृत्तिः आधुनिके काले कविलोकेऽपि असकृत् दृश्यते। काव्य- प्रयोजनेषु यशः अर्थकरणमपि दृश्यते। मम्मटेन काव्यप्रयोजनवर्णनपरे श्लोके – **काव्यं यशसेऽर्थकृते** इत्यादिके प्रारम्भे एव यशसः, अनुपदमेव अर्थस्य च गणनं दृश्यते। प्राचीनाः कवयः प्रायशः सर्वे तदनन्तरप्रयोजनेषु प्रधानतया मनांसि संस्थाप्य व्यरचयन् काव्यानि। सद्यः परमानन्दकल्पनं, कान्तासम्मिततया उपदेशकरणञ्च तेषां प्रधानाशयः आसीत्।

आधुनिके काले बहूनां कवीनां लक्ष्यं यशः, धनं वा अथवा उभे। ततः अपि इतिवृत्त- विषयेऽपि आधुनिकानां कवीनां दर्शनं विलक्षणमेव अस्ति। सार्वकालिक-प्रयोजनापेक्षया तात्कालिकप्रयोजनेष्वेव तेषां दृष्टिप्रसारः अस्ति। समाजगताः विभिन्नाः आर्थिक – राजकीय-चारित्रककुलमतादि विभेदाः अपि कवीनां रचनासु दत्तपदाः सन्ति। तादृश सिद्धान्तेषु बद्धमनसः इव नटन्तः कवयः स्वार्थैकसम्पादनपराः अविरलाः सन्ति। तादृशान् कवीन् तत्कवित्वं, तत्प्रवृत्तिं, तेषां कुहकप्रवर्तनञ्च अधिक्षिपन् डा. सूरं श्रीनिवासुलु महोदयः कविजनमण्डनभाणं व्यरचयत्।

अस्मिन् बृहस्पतिः नायकः। प्राचीनभाणनायकाः इव अयं न विटः किन्तु धूर्तः। कविसम्मेलनं प्रति गन्तुमुद्युक्तः सः रङ्गस्थलं प्रविशति। सायंसमये कविसम्मेलने स्वीयां कवितां श्रावयित्वा निर्गच्छति। मध्ये मिलद्भिः जनैस्सह संवदन् विवदन् अधिक्षिपन् च अयं कविकुलकौशलं, समाजे तद्विषये विद्यमानं विरक्तभावञ्च सोत्प्रासं वर्णयति। कण्डूतिमात्र परिपूर्णकवीशानां दुस्थितिम् अहन्ताञ्च सम्यक् दर्शयति कविरस्मिन् भाणे।

प्रस्तावनायामेव व्यङ्ग्यानुकरणरूपः कश्चन श्लोकः रचयितुः तत्प्रियत्वं सूचयति।

नमः कवीशाय सहस्रवर्त्मने सहस्रसन्मानदिनाभिलाषिणे।
निजप्रशंसैकविलासशालिने प्रसारितानन्तजनान्तरात्मने॥

अयं श्लोकः अधोनिर्दिष्टस्य व्यङ्ग्यानुकरणरूपः।

नमो स्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षि शिरोरु बाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः॥

प्रस्तावनायां सारमेयपदं श्लिष्टं प्रयुज्य कविः कथोद्घातरूपेण पात्रं प्रवेशयति। सः श्लोकः मनांसि आवर्जयति।

किं सारमेयानपसारयामि
सभागतान् चालितवालहेलान् ?
किं सारमेयानपि सारयामि
भावानशेषान् कवितैकगत्या ॥

श्लोकसमनन्तरमेव बृहस्पतिः 'क एष मयि स्थिते सारमेय भावग्राही' इति वदन् प्रविशति। सारमेयभावपदप्रयोगविधानमत्र कवेः प्रतिभां पाण्डित्यञ्च निरूपयति। एतादृशः पात्रप्रवेशः कथोद्घातपदेन व्यवह्रियते रूपकलाक्षणिकैः यथा –

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः।
गृहीत्वा प्रविशेत्पात्रं कथोद्घातो द्विधैव सः॥

दशरूपकम् 3.9

ऋषिकल्पाः महाकवयः बृहन्ति काव्यानि विरचय्य अपि 'आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञान'मिति सप्रश्रयं वदन्तः यशश्शेषाः बभूवुः। अधुना पुनः कवितापेक्षया, तत्प्रचारस्य, तत्फलस्य च प्राधान्यं कल्पयन्तः, अभिलषन्तश्च कवयः कथं सन्तीति अस्मिन् श्लोके सन्दर्शयति कविः –

एकं विलिख्य कविताशकलं कदापि
हस्ते निधाय नियतं निरतं तमेव।
गायन् स्वभावजनितैस्स्वरतालरागैः
योऽभून्महान् कविरिति प्रथितः प्रकामम्॥

डमरुकादिषु अधिक्षेपग्रन्थेषु कविलोकाधिक्षेपणपराणि पद्यानि बहूनि दृश्यन्ते।

नटसमागमभाणः

नटसमागमभाणः समाजाधिक्षेपणपरः। सन्तुष्टमनस्कैः महाराजैः सेवकेभ्यः यत् किञ्चित् दानं, सन्तुष्टैः सामान्यैरपि परिचारकेभ्यः यत् किञ्चित् दानं, कार्यसमाप्त्यनन्तरं तत् फलभोक्त्रा तत् कार्य साधने सहकृतवते, सहकृतवद्भ्यो वा यत् किञ्चित् दानं – एतादृशी व्यवस्था

प्रायशः सर्वत्र दृश्यते। भक्तस्य भगवता सम्बन्धेऽपि एवं रीत्या कृतज्ञता प्रकटनं भवत्येव। किन्तु एतादृशानां पारितोषकाणां दाने स्वीकरणे वा निर्बन्धः अनभिलषणीयः दण्डनीयश्च। तथापि केषुचित् देशेषु कासुचित् जातिषु विद्युक्तधर्मं निर्वोढुमपि यत् किञ्चित् बलात् स्वीकरणं सम्प्रदायो बभूव। अनिवार्यतया अनिष्टेनापि दीयमानस्य एतस्य परितोषकस्य अधिक्षेपणं प्रधानीकृत्य नटसमागमभाणः विरचितः।

अत्र नटाः वस्तुतः न नटाः। किन्तु स्वयं भ्रष्टा अपि शिष्टा इव सञ्चरतः शिष्टत्वमेव प्रगुणतया दर्शयन्तः, अत एव नटाः। ते च विभिन्नकार्यालयोद्योगिनः अथवा कार्यालये विभिन्नोद्योगिनः। ते सर्वे अपि नटाः इति निश्चित्य रचयिता कार्यालये तेषाम् उपस्थितिं नटसमागमं मत्वा भाणे दर्शयामास। नान्द्यन्ते एव नेपथ्यतः ग्रन्थस्वरूपं दर्शयामास। यथा –

घट्टे घट्टे धनाकाङ्क्षा घट्टे घट्टे विलम्बिता।
तं तु घट्टं न पश्यामि यत्र निष्कामकर्मता॥

श्लोकोऽयं प्रसिद्धस्य "देशे देशे कलत्राणि देशे देशे च बांधवाः। तं तु देशं न पश्यामि यत्र भ्राता सहोदर ॥" इत्यस्य व्यङ्ग्यनुकरणरूपः, किन्तु गभीरार्थ निरूपकः। निष्कामकर्मता न क्वापि दृश्यते। परन्तु सा अभिलषणीया इति रचयितुः आशयः। अत एव भाणप्रारम्भे एव नेपथ्यतः सूचितोऽयम् अंशः।

अस्मिन् भाणे वराकः नायकः। सः विद्याधिकारि कार्यालयस्य पुरतः स्थित्वा यातायात जनजीवितगतान् अधिकारिजनजीवनगतांश्च नाट्यविशेषान् प्रदर्शयति। केषाञ्चित् अधिकारिणां कर्तुं कारयितुं वा असमर्था मतिः भाणप्रारम्भे एव प्रस्तुता। कार्यालये विद्यमानाः उद्योगिनः विविधाभिः युक्तिभिः उत्कोचदानं निर्बन्धं कृत्वा कथं प्रवर्तन्ते इत्ययं विषयः भाणे सम्यक् प्रदर्शितः। उद्योगिषु विद्यमानान् स्थायिभेदान् मनसि निधाय सर्वेष्वपि उत्कोच प्रीतिः अस्त्येव किन्तु विभिन्नस्तरेषु इति भावं

मनोहरं प्रकटयति अस्मिन् श्लोके –

अधिकारी वनासक्तः कार्यकृत् वृक्षलोलुपः।
सेवकः पर्णतृप्तश्च कुतः कर्तव्यपालना॥ इति

न केवलं कार्यालयोद्योगिनः किन्तु तत् सन्निधिमागताः राष्ट्रे तत्र तत्र निवसन्तः अपि केचित् कर्मपलायिनः तत्रागत्य कालं क्षिपन्ति इत्ययं विषयोऽपि भाणेऽस्मिन् प्रदर्शितः। अर्जुने गाण्डीवं परित्यज्य खिन्ने कर्तव्यपालनं अनिवार्यमिति बोधयितुं गीताविर्भावः। किन्तु अत्र एते उद्योगिनः गाण्डीवसदृशं कर्म त्यक्तवन्तः किन्तु न क्लिन्नाः, तर्हि अस्मिन् देशे अकर्मण्यतां अपसारयितुं कर्तव्यतां प्रसारयितुं वा मार्गः कः इति न केवलं कविना पाठकैरपि आलोचनीयम्।

विद्याधिकारिकार्यालये विभिन्नस्तरगताः उद्योगिनः तत्र समागताः। राष्ट्रे विभिन्न - प्रान्तस्थाः जनाः च अत्र सूचितानि पात्राणि। उद्योगिनः केनापि व्याजेन कार्यालयबहिर्गन्तुम् उद्युक्ताः। राष्ट्रीयाः तत्कार्यालयसम्बन्धिनः जनाः स्वकर्तव्यं परित्यज्य केनापि कारणेन कार्यालयस्य अन्तः प्रवेष्टुमुद्युक्ताः। सर्वेपि स्वीयं वास्तविकम् आन्तर्यं निगूह्य तद्भिन्नतया अभिनये एव आसक्ताः। अत एव सर्वान् तान् नटत्वेन एव सम्भाव्य तेषां समागमं नटसमागममिति मत्वा भाणस्य अस्य नाम निर्दिष्टम्। भरतवाक्ये कविः स्वीयामाकाङ्क्षां दर्शयति। यथा –

वर्धतां शक्तिराराष्ट्रं शक्तिः कर्मसु वर्धताम्।
वर्धतां स्वार्थसन्न्यासः पुरोभाग्यैकरूपिणी॥

चतुर्ष्वपि एतेषु भाणेषु इतिवृत्तस्वीकारे नवीनता दरीदृश्यते। समाजं वर्तमान-स्थित्यपेक्षया धर्मकर्मनिरतायां स्थितौ द्रष्टुकामाः सर्वेपि वर्तमानस्थित्या असन्तृप्ताः विषण्णाश्च तत्परिष्कारे कृतयत्नाः एव भवन्ति। कलातत्वस्यापि लक्ष्यम् उत्तमसमाज सन्दर्शनमेव। तदेव मनसि निधाय आभिनवचतुर्भाणी कर्ता सामाजिक समस्याः आधारीकृत्य

भाणान् रचयामास।

सप्तद्वीपानुकरणं नाट्यमिति भरतः नाट्यशास्त्रे नाट्यं निर्वक्ति। अभिनवभारत्याम् अभिनवगुप्तः अनुकरणपदं सम्यक् अवलोक्य अनुव्यवसायो वा अध्यवसायो वा तदर्थः इति विवृतवान्। अतः नायकप्रवृत्तेः अनुव्यवसायो वा अध्यवसायो वा नाट्यं भवति। तत् मनसि निधाय एव धनञ्जयः दशरूपके –

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते।
रूपकं तत्समारोपात् .... इति निर्वक्ति।
रसार्णवसुधाकरकर्ता -

यथा मुखादौ चन्द्रादेरारोपे रूपकप्रथा।
तथैव नायकारोपे नटे रूपकमुच्यते।

रसार्णवसुधाकरम् 3.2

- इति सुस्पष्टं रूपकलक्षणं वदति। नटे नायकारोपस्य सत्त्वात् रूपं रूपकं भवति, मुखे चन्द्रस्य आरोप इव। "सन्दर्भेषु दशरूपकं श्रेयः" इति वामनः श्रव्यकाव्यापेक्षया दृश्यकाव्यमेव श्रेयस्करम् इति सम्भावयामास। रूपकमिदं दशधा विभक्तम्।

नाटकं सप्रकरणमङ्को व्यायोग एव च।
भाणः समवकाराश्च वीथी प्रहसनं डिमः।
ईहामृगश्च विज्ञेया दशे मे नाट्यलक्षणे॥ *(ना.शा.1.86)*
भरतस्य निर्देऽशोयं नाट्यशास्त्रे।

एतेषु दशसु अपि भाण एव प्राथमिकः स्यादिति केषाञ्चित् विमर्शकाना-मभिप्रायः। कैश्चित् वीथ्याः कैश्चित् च अङ्कस्य, कैश्चित् च प्रहसनस्य प्राथमिकं स्थानं दत्तम्। तान् सर्वान् परिशील्य संस्कृतभाणसाहित्यग्रन्थे तत् कर्तृभ्यां प्राथमिकं रूपं भाणस्यैवेति स्पष्टं निरूपितम्। संगीतरत्नाकरे तत् कर्ता शार्ङ्गदेवः भाणस्य नृत्तप्रधानत्वं प्रतिपादयति। नृत्तं च काललयाश्रयं सत् अनुकरणस्य प्राथमिकं रूपम्। तत्

परिवर्तन रूपं भावाश्रयं नृत्यम्। ततोऽपि परिनिश्चितं रसाश्रयं नाट्यम्। अतः नृत्तप्रधानः भाण एव प्राथमिकं रूपकं स्यात्। भाणः एकाङ्कः एकाहार्यः च। एतद्वयमपि तस्य प्राथमिकत्वमेव सूचयतः। अन्यत् च संस्कृत नाटकादिषु अदृश्यमानम् ऐक्यत्रयं (कार्यैक्यं, कालैक्यं, स्थलैक्यं च) प्रायशः भाणेषु दृश्यते। भाणः आकाशभाषितप्रधानः दृश्यता श्रव्यतयोः मध्ये तिष्ठति। एकहार्यत्वात् दृश्यं, बहुपात्रसूचनस्य सत्वात् श्रव्यं च। एषा स्थितिः प्राथमिकत्वं द्रढयति भाणस्य। रसजीवातुभूतस्य सात्विकाभिनयस्य भाणे प्राधान्यं नास्ति। वाचिकाभिनयः एव अत्र प्रधानः। तदपि तस्य प्राथमिकत्व सूचनमेव। इत्थं प्राथमिकरूपकत्वेन सम्भावितस्य भाणस्य लक्षणम् आलङ्कारिकवचनेषु परिशीलयामः।

आत्मानुभूतशंसी परसंश्रयवर्णनाविशेषस्तु।
विविधाश्रयो हि भाणो विज्ञेयस्त्वेकहार्यश्च॥
परवचनमात्मसंस्थं प्रतिवचनैरुत्तरोत्तरग्रथितैः।
आकाशपुरुषकथितै रङ्गविकारै रभिनयैश्चैव॥
धूर्तविटसंप्रयोज्यो नानावस्थांतरात्मकश्चैव।
एकाङ्को बहुचेष्टः सततं कार्यो बुधैर्गुणैः ॥

रचनस्यास्य विश्लेषणे प्रधानांशाः इत्थं भवन्ति। एकहार्यंत्वं, आकाशभाषित-प्रायत्वं, धूर्तविटनायकत्वम्, आत्माश्रयता, पराश्रयतत्वम्, उत्पाद्येतिवृत्तवत्वं, एकाङ्किकत्वं, वीथ्यङ्गलास्याङ्गसहकृतिमत्वम्, आङ्गिकाभिनयप्राधान्यं, वेश्याप्रकृतिभूयस्त्वं, श्रृङ्गाराभासप्रायत्वञ्च। एतेषां लक्षणानामनुसरणे प्राचीनाः आधुनिकाश्च भाणकर्तारः इतिवृत्तनिर्वहणे तुल्यमेव मार्गमनुसृतवन्तः। किन्तु इतिवृत्त-स्वीकारे उभयोर्मध्ये महान् भेदः। तथाहि –

प्राचीनभाणेषु प्रायशः सर्वेषु सामान्यजनानां श्रृङ्गारप्रधानाः तदाभासप्रधाना वा समालापाः, पुरुषायितवर्णनं, प्रणयकर्मणि प्रवृत्ते केनापि हेतुना तदुपभोगभङ्गः, कामोपदेशाः, नारीनिन्दा, स्नुषापीडा, वेश्यामातृवर्णनम्, वीररसाभासः, नर्मभाषणानि, विशिष्य कलत्रपत्ररचनं

च सामान्यलक्षणानि। नाटकादिषु अपि यद्यपि श्रृङ्गाररस-प्राधान्यं दृश्यते तथापि भाणेषु तस्य श्रृङ्गारस्य तदाभासस्य वा साधारणजन-समीपनयनं विशेषः। संस्कृतरूपकेषु बहुषु राजजीवनेन सह साधारणजनजीवनस्यापि प्रदर्शनं भवत्येव। तथापि भाणेषु नायकेषु सूचितपत्रेषु वा बहवः सामान्यजनाः तत्प्रतिनिधिभूताश्च। अतः अत्र वर्ण्यमाणः श्रृङ्गारः विलक्षणः। अतः तदनुकूलतया एव इतिवृत्तस्वीकरणं, तन्निर्वहणं च भाणेषु दृश्यते। प्राचीनाः भाणाः प्रायशः सर्वे आलङ्कारिकलक्षणानुसारं धूर्तविटसम्बद्धमेव इतिवृत्तम् उत्पाद्यमपि स्वीचक्रुः। किन्तु आधुनिकाः इतिवृत्तविषये विशिष्ट्या गत्या समाज-सन्निहितान् एव अंशान् स्वीकृत्य भाणेषु प्रादर्शयन्। जीवन्यायतीर्थस्य पुरुषपुङ्गवभाणः महालिङ्गशास्त्रिणः मर्कटमार्दलिकाभाणः, शिवप्रसादभारद्वाजस्य साक्षात्कारभाणः, अभिराजेन्द्रमिश्रस्य प्रत्यूषचरितभाणः अन्ये च नवीनाः भाणाः समाजसन्निहितकथांशैः निर्मिताः। एतादृश नवीनेतिवृत्तनिर्वहणे उपदेशस्य प्राधान्यम् आनन्दस्य आनुषङ्गिकत्वञ्च।

प्रस्तुतचतुर्भाणी विषयेऽपि कर्ता कथानिर्माणे नवीनमेव मार्गम् उपदेशप्रधानम् अनुससार। समाजः सर्वथा अर्थस्यैव दासः। तस्य अर्थस्य अवश्यं भावित्व-मङ्गीकार्यमेव। तथापि अर्थमात्रस्य दासत्वं गर्हणीयमेव। 'यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदयचित्तम्' इति आदिशङ्करप्रबोधोऽपि मोहमुद्गमरे। अर्थमात्रदासत्व-निरसनपरः व्यासमहर्षिरपि 'धर्मादर्थश्च कामश्च स धर्मः किं न सेव्यते' इति अधर्ममार्गैः अर्थार्जनं तिरश्चकार। तथापि मानवजातिः गच्छन् गच्छन् धर्माधर्मविचिकित्सां परित्यज्य येन केनापि प्रकारेण अर्थार्जनमेव प्रधानमिति संभाव्य, तदनुगुणमेव जीवनविधानमनुसरति। तत् फलरूपेणैव कर्तव्यवैमुख्यम्, अकर्तव्यप्रामुख्यम्, अधर्मस्य धर्मीकरणप्रयत्नः, अनुचितस्यापि उचिती- करणप्रयासः, स्वस्य समाजात् सामाजिक जीवितात् पृथक्करणम् इत्यादयः अनभिलषिताः अंशाः जीवने आवश्यकाः अभवन्। एतादृशानां समाजजीवनप्रमाद हेतूनां,

जीवलक्षणानां प्रक्षालनम् अवश्यं कार्यम्। तदपि समाजश्रेयोभिलाषिभिः कविभिः अवश्यं मनसि निधेयम्। तस्मिन् सत्येव

धर्मार्थकामममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्य निषेवणम्॥ इति

एतन्मनसि निधाय एव डा. सूरं श्रीनिवासुलु महोदयः सर्वथा वर्तमानसमाज-संबद्धान् तत्रापि अवश्यं परिष्करणीयान् प्रक्षालनीयांश्च अंशान् स्वीकृत्य अर्थकाम-वैचक्षण्यं सन्दर्शयितुं प्रायतत। धूर्तानुभवभाणे इतिवृत्तांशः यद्यपि वैदिकः तथापि सः अधुनापि समाजसन्निहित एव। अद्यापि सन्ति कितवाः, अक्षलुब्धाः, नष्टधनाः, नष्टमर्यादाः, विषण्णाः, निषण्णाश्च कुत्रापि बहिः दृश्यन्ते एव। मध्यकाले अपि नलधर्मराजादयः अक्षप्रियास्सन्त एव भग्न जीवनाः अभवन्। अतः व्यसनरूपस्य तस्य सर्वकालेष्वपि स्थितिः सम्भवत्येव। अतः धूर्तानुभवभाणः प्राचीनेषु नवीनः, नवीनेषु प्राचीनश्च। यथाक्रमं तान् भाणान् परिशीलयामः।

धूर्तानुभवभाणः

(गीर्वाणरूपकोत्पत्तिविषये वेदेभ्य एव तदभूदिति वादोऽप्यन्यतमः। यमयमी संवादादि सूक्तानां संवादरूपाणां तत्र अवस्थितिरेव तत्कारणमिति तत्पक्षी। प्राचीनकाले तिथियज्ञक्रियासु एतेषां सूक्तानामन्तरा वचनानि परिकल्य ऋत्विजः अभ्यनयन्निति, अर्वाचीनकाले तानि वचनानि व्यनशनन्निति च तदभिप्रायः। न केवलं संवादसूक्तविषये किन्तु एकपात्रसूक्तविषयेऽपि एवमेव भवेन्नामेति धिया वैदिकक्रियासु गतविनियोगमिदमक्षसूक्तं (ऋग्वेद १०-३४) अत्र भाणीक्रियते। भाणच्छायाः बह्व्यः अस्मिन् सूक्ते संदृश्यन्ते इति च विषयः अस्मिन् कर्मणि प्ररोचनाऽभूत् इति सहृदयाः विदाङ्कुर्वन्तु।)

प्रावेपा मा बृहतो मादयन्ति
प्रवातेजा इरिणे ववृतानाः।
सोमस्येव मौजवतस्य भक्षो
विभीदको जागृविर्मह्यमच्छान्॥

(नान्द्यन्ते)

सूत्रधारः :- (प्रविश्य) अद्य खलु इष्टिपरिसमाप्तौ सदस्यैरनुज्ञातोऽस्मि धूर्तानुभव- भाणमभिनेतुम्। तद्गृहिणीमाहूय सङ्गीतकमेव निर्वर्तयिष्यामि (परिक्रम्य-संस्मृत्य) कष्टं भोः कष्टम्। ह्यः खलु -

न मा मिमेथ न जिहेळ एषा
शिवा सखिभ्य उत मह्यमासीत्।
अक्षस्याहमेकपरस्य हेतो-
रनुव्रतामपजायामरोधम्॥

तदद्य कथं न खलु गत्वा तामाकरोमि? आहूतापि सा नागता भवेत् कदापि!

(नेपथ्ये)

अये ! समानुभवयोगिन्! सत्यमेवाभिहितम्। यतः

द्वेष्टि श्वश्रूरपजाया रुणद्धि
न नाथतो विन्दते मर्डितारम्।
अश्वस्येव जरतो वस्न्यस्य
नाहं विन्दामि कितवस्य भोगम्॥

सूत्रधारः - (आकर्ण्य) हन्त मयि कथमपि गमनोन्मुखे कोऽपि धूर्तः मां विमनाययति। तत्पुनः सभामेव गच्छामि मनःपरितोषाय। (इति निष्क्रान्तः)

(ततः प्रविशति धूर्तः)

धूर्तः- (प्रविश्य पुनः पठति)

द्वेष्टि श्वश्रूरपजाया रुणद्धि
न नाथतो विन्दते मर्डितारम्।
अश्वस्येव जरतो वस्न्यस्य
नाहं विन्दामि कितवस्य भोगम्॥

अथवा सत्यमेव सभाध्यक्षोक्तिः यदक्षाः पञ्चाक्षरी मन्त्रप्रायाः यत्तत्सेविना मक्षदेविनां सर्वबन्धविश्लथनेन मोक्षप्राप्तिरपि भवतीति। दृश्यताम् –

अन्ये जायां परिमृशन्त्यस्य
यस्यागृधद्वेदने वाज्यक्षः।
पिता माता भ्रातर एनमाहुः
न जानीमो नयता बद्धमेनम्॥

(आकाशे श्रुत्वा) किं पृच्छसि! तत्कुतस्ते खेदः? इति। ब्रवीमि श्रूयताम्। मम सहधर्मचारिणी मोक्षलक्ष्मी प्राया। सन्न्यासाश्रमादपि गृहस्थाश्रम एव उत्कृष्टस्तावदार्यैरभ्यधायि। तद्वियोगेन को वा न खिन्नो भवेत् **(मनागिव बाधामभिनीय आकाशे दृष्ट्वा)** पुनः किं ब्रवीषि!

तत्क्रियतामक्षत्यागः मोक्षलक्ष्मीप्राप्तये इति। तदपि वदामि आकर्णय –

यदादीध्ये न दविषाण्येभिः
परायद्भ्योऽवहीये सखिभ्यः।
न्युप्ताश्च बभ्रवो वाचमक्रत
एमीदेषां निष्कृतं जारिणीव।

सभामेति कितवः पृच्छमानः
जेष्यामीति तन्वा शूशुजानः
अक्षासोऽस्य वितिरन्ति कामं
प्रतिदीव्ने दधत आकृतानि॥

अङ्ग! कथमयं शृण्वन्नेव गतः। आम्! ज्ञातम्! सभाध्यक्षजामाता खल्वयम्। श्वशुरं श्वश्रूसमीप नेतुं गच्छति नाम। (अन्यतो गत्वा) अहो! कः खलु वदति दारुणा निर्मिता अक्षाः इति ते सत्यमेव दारुणाः निर्मिताः कृतान्तेन। यतः –

अक्षास इदङ्कुशिनो नितोदिनो
निकृत्वानस्तपनास्तापयिष्णवः।
कुमारदेष्णा जयतः पुनर्हणो
मध्वा सम्पृक्ताः कितवस्य बर्हणा॥

(पार्श्वतोऽवलोक्य) कथमत्र नवयौवनप्राङ्गणस्थितः युवराजोऽपि अक्षसभाङ्गण- मेव आगतः। नमः अक्षप्रभवे। अत्र च –

त्रिपञ्चाशः क्रीळति व्रात एषां
देव इव सविता सत्यधर्मा।
उग्रस्य चिन्मन्यवे नानमन्ते
राजाचिदेभ्यो नम इत्कृणोति॥

तदेनं किञ्चिदिव वादयामि। नमो युवराजाय (विलोक्य) कथमयं निशामयन्नपि न पश्यति। नात्र अस्य दोषः। दोषः पुनरेतस्य भाग्यहीनताया एव। यतोऽस्य खेलने –

नीचा वर्तन्त उपरि स्फुर-
न्त्यहस्तासो हस्तवन्तं सहन्ते।
दिव्या अङ्गारा इरिणे न्युप्ता-
श्शीतास्सन्तो हृदयं निर्दहन्ति॥

(प्रतीचीं विलोक्य) हन्त। हरितः अक्षनिहतस्य स्थितिरिव मलिनतां यान्ति। (पुरो गत्वा) कोऽत्र गृहप्राङ्गणे? अवगतम्। अयमपि सभिक एव। तस्य च –

जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरतः क्वस्वित्।
ऋणा वा बिभ्यद्धनमिच्छमानोऽ
न्येषामस्तमुपनक्तमेति ॥

तदेतस्य दर्शनदोषं परिहृत्य परतो गच्छामि। (परिक्रम्य विलोक्य च) कोऽयमत्र सभिकः स्वजायामनुनयनेऽपि अशक्त इव दृश्यते। अहो मदभिमुखमेवानीयते सः तया अभाग्यतरुण्या भगिन्या। अयि किं ब्रवीषि? (आकर्ण्य) अयं खलु ह्यः ममाधरं निपीय शपथं कृत्वा पुनरस्मिन् दिने सर्वमक्षाय समर्प्यागतः, पुनरपि अनुनयति, शपथं करोति चेति – तन्वि! श्रृणु! अयं खलु अक्षप्रियाणां प्रकारः यत् -

स्त्रियं दृष्ट्वायं कितवस्ततापा
न्येषाञ्च जायां सुकृतञ्च योनिम्।
पूर्वाह्लेश्वान् युयुजे हि बभ्रून्
त्सोऽग्ने रन्ते वृषलः पपात॥

अयं पुनः किमपि वक्तुकाम इव। आर्यः किं वदति? (श्रवणमभिनीय) न भूयोऽपि दीव्यामीति (स्वगतम्) मेधाविनः खलु पुरुषाः प्रायः नारीः विश्वासयितुम्।

(**प्रकाशम्**) किं तत्सत्यमेव! किं ब्रवीषि?

यो व स्सेनानीर्महतोगणस्य
राजा व्रातस्स प्रथमो बभूव।
तस्मै कृणामि न धना रूणध्मि
दशाहं प्राचीस्तदृतं वदामि।

इति। युक्तमेवैतत्। तदस्याः पादयोः पतित्वा प्रसादय। कथम् ? अनुपदमेव तदनेन कृतम्। अमुं खल्वद्य उपदिशामि।

वयस्य!

अक्षैर्मादीव्यः कृषिमित्कृषस्व
वित्ते रमस्व बहुमन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे विचष्टे सविताय मर्यः॥

भगिनि। किन्ते भूयः प्रियमाचरामि। तथापीदमस्तु

(भरतवाक्यम्)

मित्रं कृणुध्वं खलु मृळता
नो मानो घोरेण चरताभिधृष्णु।
निवो नु मान्यु र्विशतामराति
रन्यो बभ्रूणां प्रसितौ न्वस्तु॥

(इति निष्क्रान्तो धूर्तः)

इति ऋग्वेददशममण्डलान्तर्गतमक्षसूक्तमाधारीकृत्य सूरं वंशोद्भवेन श्रीनिवासेन गुम्फितः धूर्तानुभवभाणस्समाप्तः॥

❖❖★❖❖

गुरुवररञ्जनभाणः

जन्मिनां जीवनालम्बे यस्तु चित्राण्यतन्वत।
तं वन्दे कालनामानं चित्रकारं विवर्णकम्॥
नेत्रे क्रोधं समाकल्प्य बाष्पैस्तमभिषिच्य च।
दहेद्धृन्मर्म यस्तस्मै नमः कालाय वेधसे॥

(नान्द्यन्ते)

सूत्रधार :- (प्रविश्य) अरे रे! अलमलमकालकलालापकौशलेन। नीरूपोऽयं कालः स्वरूपपरिग्रहाय विलोकनान्येव आश्रयते। यस्तु यादृशं पश्यति तस्य तादृश एव कालः। चन्द्रिकादिग्धेषु विलोकनेषु चन्द्रिका शकलो भवति। हालाहल पूरितासु दृष्टिषु हालाहलसारो भवति।

(नेपथ्ये)

रे जाल्म! कस्त्वं कालसदृशं कालं प्रशंसन् मादृशान् विक्लवयसि। नायं रामस्य कालः, नापि धर्मराजस्य। अत्र सर्वे जन्तूनां नवावताराः नरावताराश्च। तत्तिष्ठ तूष्णीम्। अथवा समायाहि मया सह दर्शयामि कालसौभाग्यम् -

स्त्री वा पुमान् वा स्थविरो युवा वा
धनी दरिद्रः पथिकः स्थिरो वा।
स्वार्थप्रपूर्त्यै परिहृत्य लज्जां
नमन्ति कालं स्वमतानुकूलम्॥

ते खलु कालस्य शकलाः धृतजलधररूपाः मुञ्चन्ति बाष्पमनुवर्षम्

सूत्रधारः - अहो! कालकरवालच्छिन्नहृदायोऽयं कलातपस्वी कृपालयो नानुमोदते तत्प्रशंसनम्। अथवा पश्यामि तेनैव सह गत्वा तदर्शयिष्यमाणान् विशेषान्। किमाह्वयामि भाणरचयितारं सूरं वंशोद्भवं श्रीनिवासमपि। अथवा किन्तेन अल्पधिया एतादृश भाणरचयित्रा। गच्छाम्यहमेक एव।

(सूत्रधारः निष्क्रान्तः)

- इति प्रस्तावना -

(ततः प्रवशति कृपालयः)

कृपाः - हन्त! कालः .. कालः। सर्वेष्वपि वैपरीत्येषु काल एव प्रमाणीक्रियते। साधुस्वभावस्य वैपरीत्ये काल एव प्रमाणम्। अक्रममार्गेण धनस्य सम्पादने काल एव प्रमाणम्। स्वार्थे कालः प्रमाणम्। मानादिकस्य परित्यागे कालः प्रमाणम्। केन आरब्धोयं कालनीतिमार्गः उत्तराभिलाषिणः अस्मादृशान् निरुत्तरान् करोति।

जीवत्सु साधुवर्येषु त्यागरूपेषु धार्मिकैः।
सौख्यैस्संसेव्यमाननां ते हि नो दिवसा गताः॥

अन्नार्थिनां न चास्त्यन्नमार्तानां नहि रक्षणम्।
धर्मार्तानां न वा धर्मः विधे! कालं विकल्पय॥

अथवा किं वा लभ्यते अकालकालनिन्दया। अतीताः सप्तमासः विना वेतनदानेन। किं नवमासपरिसमाप्तेः प्राक् वेतनशिशूदयः न भविष्यति। केनोक्तम् 'आचार्यदेवो भव' इति तमहं प्रशंसामि। यतः आचार्य! देवो भव इति तेन सम्यगुपदिष्टम्। मरणाभावे देवत्वप्राप्तिः न भवति खलु। यावत् प्राणिनः प्राणन्ति तावत् शरीरसंरक्षणार्थं प्रयत्नः करणीय एव। तत्पाठशालां गत्वा विरामपत्रं समर्प्य अनन्तरमेव विपणिं गच्छामि। स्यादेकोऽपि दयासिन्धुः ऋणादाता। (परिक्रम्य) इयमेव पाठशाला, अग्रभागे यस्याः चलनचित्रप्रदर्शनशालापि वर्तते विद्वद्विनोदाय।

अनल्पकल्पनोपेतं चित्तविभ्रान्तिहेतुकम्।
नाटकादेशभूतञ्च चित्रं तत्र प्रदृश्यते॥

तस्यां चित्रशालायां प्रतीहार पदव्यपि श्रेष्ठतरा यत्र च अनुक्रमं वेतनलाभः। तथापि कुलीनता व्याकुलतां जनयति।

कुलेन नैव प्राप्नोति किञ्चित् कोऽपि कदापि च।
कुलं तथाप्याश्रयन्ते हन्त! सा कुलपक्षता॥

(पुरो गत्वा) (विलोक्य) अत्रैव प्रधानोपाध्यायप्रकोष्ठस्य पुरतः स्वपिति औपस्थितिकः। मन्ये प्रकोष्ठे प्रधानोपाध्यायाः अपि तत्कर्मरता एव स्युरिति। किं वा अनेन अल्पप्राणिना कर्तुं शक्यते, यदा विद्याधिदेवता एव दीर्घतरं निद्राति। अत एव एते गृहेषु सुखनिद्रामलभमानाः पाठशालामागत्य यथेच्छं स्वप्नेषु स्वर्गलोकं पश्यन्ति।

यथार्थजीवनात् सत्यं स्वप्नजीवनमुत्तरम्।
प्राप्ताप्राप्तसमानत्वादनुभूतेः परिप्लवात्॥

(द्वित्राणि पदानि गत्वा) अरे रे औपस्थितिक! किमुपस्थितं प्रधानोपाध्यायैः। (श्रुतिमभिनीय) किं ब्रवीषि? स्वाध्याये समासक्ता इति। परिशेषन्यायेन प्रवचने अनासक्ता इति खलुः अर्थः लभ्यते। बाढम् (प्रवेशं नाटयित्वा) मान्या प्रधानोपाध्यायाः! इदं विरामाभ्यर्थनपत्रम्। अनुमन्यतामस्मिन् दिने गन्तुम्।

(श्रवणमभिनीय) किमुच्यते? नास्त्यवकाशः, न दीयते इति। किन्तव पैतृकमैश्वर्यमिदम् ? अथवा देहि पञ्चशत-रूप्यकाणि ऋणरूपेण।(पुनराकर्णनमभिनीय) किं वदन्ति महाभागाः अवश्यमनुमन्यते विराम इति। अनुमतम्। जानामि न कोऽपि वर्तते मूर्खः स्वधनव्ययेन परसुख-सम्पादनार्थी। तथाप्येवं भवद्भिः कृपा निरुपमा प्रादर्श्येव। तत्साधयाम्यहम्।

(निर्गच्छन्) कोऽयमत्र कोलाहलः उपाध्याय विश्रान्तिमन्दिरे। **(दर्शनमभिनीय)** नित्यकार्यक्रम एवायम्। सर्वे उपाध्यायाः क्रीडापत्रैः .... नहि नहि विद्यार्थिनां भविष्यजीवनैः .... खेलन्ति। (गमनं नाटयति)

(विपणि प्रवेशं सूचयति) इयमेव पण्यवीथिका। श्रुतमेव सर्वैः श्रीकृष्णदेवराय साम्राज्ये पण्यवीथिकासु राशीभूताः मणिवज्रादयः विक्रीता इति। अधुना पुनः जीर्णपलाण्डुराशयः तिन्त्रिणीफलराशयश्च रत्नतुल्या विक्रीयन्ते। साम्प्रतं सा सूक्तिः यथार्था यत् 'न रत्न मन्विष्यति मृग्यते हित' दिति। तदुपसर्पामि आपणम्। (विचिन्त्य) कथं वा विक्रेतुर्मुखं

पश्यामि एतावदवधि अदत्त्वा धनम्। (पुनः विचिन्त्य विदृश्य च आत्मानं प्रति) मूर्ख! अत एव त्वमुपाध्यायस्संवृत्तः। मास्तु ते संशयः। विक्रेता एव तव मुखं न पश्यति॥

(प्रवेशं नाटयित्वा) नम आपणाधिपतये! (स्वगतम्) एवं नाम खलु सरस्वत्यपेक्षया लक्ष्मीरेव अभिलषणीयेति कथनम् (श्रवणमभिनीय) किमुच्यते। आनीयतामासनमुपाध्यायायेति।

(विचिन्त्य स्वगतम्) मामधिक्षिपन् सेवकमेव वदति अयं मूढः, मम हृदये एतादृशवचनशल्यपरम्परा आर्द्रव्रणा वर्तत इति न जानाति।

(प्रकाशम्) अलमलमुपचारेण। किमुच्यते - उपचारः निर्मूल्योऽत्र लभ्यत इति।

(स्वगतम्) परिशेषन्यायेन इतरन्नेति खलु। अस्य उक्तिचातुर्यं प्रशंसनीयम्। एतत्सहस्रांशप्राप्तावपि उपाध्यायानां जीवितं सुखमयं भविष्यति, भवतु प्रकृतमनुसरामि।

(प्रकाशम्) मित्र! गृहे तण्डुलानां प्रध्वंसाभावो जातः तद्भवानेव पूरको भविता। (श्रुतिमभिनीय) किं वदसि? अरे तेषामत्यन्ताभाव एवेति। (विहस्य) जानामि ते तर्कशास्त्रपाण्डित्यं चमत्कार भाषित्वञ्च। तद्गच्छाम्यहम्। सायंकाले प्रेषयसि वा?

(विलोक्य) (स्वगतम्) कथमयमनादरं सूचयति तिर्यक् शिरश्चालनेन। तदेनमनुनयामि।

(प्रकाशम्) मित्र! मम शिरः न्यासीकृत्यापि ते धनं दास्याम्येव (सस्तम्भं विलोक्य) किं वदसि तव शिरः कः न्यासीकरोतीति (सवैराग्यम् विहस्य) जानाम्येव। तथापि आशा प्राणसंरक्षणपरायणा मामेवं प्रलापयति।

(हस्तौ गृहीत्वा) इमौ नैव करौ। तव निरादरणे अहमत्रैव प्रायोपवेशं करोमि।

(विषण्णो भवति – पुनः श्रवणमभिनीय सहर्षम्) किमुच्यते? अङ्गीकृतमिति। किं तण्डुल दानाय उत प्रायोपवेशाय?

(आकर्णनमभिनीय) तण्डुलदानाय एव। चिरञ्जीव चिरञ्जीव। एतावानेव मे विभवः किं करोमि? साधयामि तावत् - **(गमनं नाटयति)**

हम् कार्यं साधितम्। एकमास पर्यन्तं प्राणस्थितेः निश्चय स्सम्बभूव। शाकानामाढकादीनामभावेऽपि प्राणधारणं कर्तुं शक्यते। आह खलु मानवप्रातिपदिकः -

ऋणं कुर्यात् गणे भूयात् याचेत दीनतां व्रजेत्।
येन केनाप्युपायेन रक्षयेत् प्राणपञ्चकम्॥

(पुरो विलोक्य)

किमत्र सर्वे जनाः एकीभूय पश्यन्ति? कोऽपि ऐन्द्रजालिकः इन्द्रजालं करोति उत आयुर्वेदौषधविक्रयः?

(उच्चैः) भो भो जनाः किंतत्? (श्रवणमभिनीय) किं वदन्ति कोऽपि उपाध्यायः पेन्षन् पत्राणि करे निधाय मार्गे पतित्वा अम्रियत इति? रे रे मूर्खाः तत्किमर्थं कोलाहलः? तस्य भाग्यात् भाग्यनगरमागत्य अम्रियत। राष्ट्रे कति वा वर्तन्ते भाग्यनगरे प्राणान् परित्यक्तुं लब्धावकाशाः? अभिनन्दन्तु तमदृष्टमूर्तिं पुरुषम्।

कुतो वौचित्यसन्दृष्टिः मृत्योर्नास्ति पदे पदे।
मृतमावृत्ति स्वीकारात् पुनर्हन्तुं समुद्यतः॥

तत्सर्वे छन्दतः छन्दं दत्वा दहन्तु तं समाजकलङ्कं भूतमद्यैव। अहमनन्तर करणीयं तावत् पश्यामि।

(परिक्रम्य) अस्य समीपे एव चिकित्सालये मे मित्रमस्ति अचिरादेव, राजा भूत्वा राजयक्ष्म व्याधिसम्प्रात्या। हन्त! राजयक्ष्मा उपाध्यायानामुदरवितानेषु सम्बभूव। तत्फलं पुनः सर्वा जातिरनुभवति। रक्तं वमन्ती अनुपदं म्रियते च।

कार्यकारणयोर्भिन्नदेशत्वे न ह्यसङ्गतिः।
गुरोर्देहे राजयक्ष्मा मृतिर्जाते निरन्तरम्॥

तत्प्रविश्य परामृशामि मित्रम्।

(प्रवेशं सूचयित्वा) प्रियमित्र! अपि कुशलं तव व्याधेः?

(आकर्णनमभिनीय) किमुच्यते? अस्ति विशेषः भवादृशानामाशीः प्रभावेणेति।

(विहस्य) न मादृशानामाशीविशेषेण। किन्तु "योगक्षेमं वहाम्यहम्" इति वदता जीवितबीमानिर्वाहकाणा माशाविशेषेण। अस्मच्छ्रेयःकाङ्क्षिणः त्रय एव वर्तन्ते, जीवित बीमानिर्वाहकाः, ऋणदातारः, नागरकबस्यान प्रचालक्श्च। कुरु ऋणं, ऋणदाता एव ते करिष्यत्यायुष्यहोममिति मे गुरोः सिद्धान्तः। तत्कृतेनैव .... **(अर्थोक्ते विरम्य)**

दिष्ट्या आगच्छत्यत्रैव अदृष्टरेखः सहोपाध्यायोऽपि, यस्तु सदा पाठप्रवचनं परित्यज्य, अदृष्टरेखा एव सर्वत्र कारणमिति प्रकटयन् अदृष्टरेख इति पारिहासिकं नाम लेभे।

नमो महद्भ्यः उपाध्यायवृत्तिपरिणतकेशेभ्यः। किमपि वदन्तीव आर्याः?

(श्रवणमभिनीय) कथमत्रागतो भवान् भारतीय विरामः उत फ्रेञ्च विराम इति। भवान् यथा मन्यते तथा।

(श्रवणमभिनीय) किमुच्यते अस्ति किं वेतनप्राप्तेरवकाशः अचिरेणेति ?

(स्वगतम्) तव वेतनप्राप्त्यावश्यकं किम्? गृहाध्यापनार्जितेन धनेनैव तव जीवनमधिगच्छति खलु। तस्याप्यभावे परीक्षायां विद्यार्थिनः कृतार्थान् कर्तुं स्वीक्रियमाणेन धनेन वा जीवसि।

(प्रकाशम्) वेतनप्राप्तिः? प्रभुत्वाय पारुष्यापेक्षया सारल्यमेव रोचते। अत एव वेतनप्राप्तेरपि वेदनप्राप्तिविषये बद्धादरस्तत्। आम् किं भवतां समीपे पञ्चाशत् रूप्यकाणि लभ्यन्ते अचिरादेव दास्यामि। किं वदति?

(श्रवणं नाटयित्वा) मम हृदयमिव प्रविश्य पृष्टवान् त्वम्, अहमेव भवन्तम् अभ्यर्थयितुमागत इति। बाढम् **(स्वस्मिन्)**

अनासक्ते ऋणं दातुं कस्मिन्नपि सुधीमणौ।
स्वयमभ्यर्थना ह्येव धनाभावत्वसूचना॥

(प्रकाशम्)

तद्गमिष्यामि तावत् धनलाभाय।

(गमनं नाटयन्) अधिकारिला ङ्गलग्राहिणा अनेन परित्यक्तेऽपि कर्तव्ये न कोऽपि लक्षयति। लक्षितेऽपि किमपि प्रतीकर्तुं न शक्नोति।

(पुरो विलोक्य) अहो। आगच्छत्येव व्रजाङ्गनावल्लभः श्रीकृष्णः, यस्य वाक्प्रभावेण मन्त्रप्रभावेणेव उपाध्यायनिरीक्षणालये, पाठशालायां, कार्यदर्शिनामपि गृहे वह्निः निरन्तरं ज्वलति। अयं विद्यार्थिनः न बोधयति, किन्तु उपाध्यायानेव जीवितपाठान् अध्यापयति। वयः पुनः प्राप्तं तरुणामिव पाषाणानामिव।

नायं वक्ता न वा श्रोता नापि मध्यगतिस्तथा।
स्वलाभायेतरान् सर्वान् शलभीकर्तुमीहते॥
भारतीमं समाश्रित्य जन्मान्तरप्रयत्नतः।
सोरस्ताडं प्रलापेषु वैधव्यमपि काङ्क्षति॥

सत्वादेवैतादृशानां लोकस्य गतिरीदृशी संवृत्ता। तस्य विलोकनमिहलोक-श्रेयसे न भवतीति अनुपदमेव अतिक्रम्य गच्छामि।

(अन्यत्र गत्वा) अत्रैव खलु चत्वरस्थाने सर्वे उपाध्यायाः सम्मिलन्ति। मिलित्वा च उपाध्यायाः प्राधानोपाध्यायान् प्रधानोपाध्यायाश्च तदुपरितनान् अधिकारिणश्च प्रतिदिनं विविधं

सम्मानयन्ति वाक्यपारुष्यप्रसारैः।

(सविमर्शं विलोक्य) कोऽत्र अस्मिन् कोणे एकाकी तिष्ठति? आम् अवगतम् अवगतम्। अयं खलु यथार्थवादी। उपाध्यायसङ्घसमावेशेषु अधिकारैस्साकं कर्तव्यमपि चर्चनीयमिति प्रतिपादनात् बलात् निष्कासितः। तद्युक्तमेव यत :-

मेघान्तर्वर्तिनी शम्पा कालान्तर्वर्तिनी कला।
भावान्तर्वर्तिनी विद्या क्षणमेव हि जीवति॥
सर्वेऽपि नानुमोदन्ति दीनमेनं कृतश्रमम्।
कर्तव्यैकोन्मुखं नित्यं तस्मात् सङ्घबहिष्कृतः॥

कति वा सन्ति एतादृशाः यादृशानां प्रवाहः उपाध्यायवृत्तिं प्रक्षालयितुमलं भवति। परोक्षेणैव तं नमामि यतस्तस्य समीपगमनं तत्खेदसंवर्धकमेव स्यात्।

(विचिन्त्य) अस्ति खल्वस्मिन् दिने सायं उपाध्यायसम्मानोत्सवसभा वार्षिकः श्राद्ध इव प्रचाल्यमाना। यस्मिन् दिने यस्याञ्च सभायां सर्वे बाष्पामृतबिन्दुभिः वाङ्मधुपरिषेचनैः उपाध्यायान् हिमवन्नगोन्नतशिखराणि आरोपयन्ति। उपाध्याया अपि तदनुगुणवर्तनाः अस्मिन् दिने एव कृतदीक्षाव्रताः त्यक्त स्वार्थसर्वस्वाश्च शठेषु शाठ्यं समाचरन्ति। सर्वं नटनारूपमेव।

जगन्नाट्यसूत्रधारदृश्यमानेऽस्ति नाटके।
सर्वपात्रसमारम्भः नटनान्यपराङ्मुखः॥

तथापि गत्वा पश्यामि। उपाध्यायस्य सतो मम उपाध्याय निन्दातिरस्कारौ न युज्येते खलु।

(पुरो व्रजित्वा) - (दृष्ट्वा) अहो! अहो! गुरुभ्यः गुरुपूजा इति स्वागतपट्टिका अपि अवलम्बिता।

(उच्चैः) भो भो उपाध्यायाः। भवन्तः अधुना धन्याः बभूवुः। विस्मरन्तु सप्तमासेभ्यः वेतन स्वीकृतिः नास्तीति विषयम्। एतादृशे

महति काले न संस्मरणीयाः जगदपवादभूताः तादृशाल्पविषयाः। किमुच्यते

(आकर्णनमभिनीय) प्रविशन्तु अन्तरिति। बाढ्म्, अन्तःप्रवेश एव अस्माकमनुमतः बहिर्निर्गमनं जीवनमेव प्रमादे पातयेत् - यः कोऽपि स्यादत्र उत्तमाधिकारिलाङ्गलग्राही।

(पुरः परिक्रम्य-सानन्दम्) एष खलु लोचनरमणीयः सन्निवेशः। सर्वे उपाध्यायाः कलकलायमानमुखाः सम्मानोन्मुखाः वेदिकायां सन्ति क्षीरनीरे इव सम्मिश्र्य एकस्यां स्थाल्याम्। कोऽत्र क्षीरम् नीरञ्च निर्णेतुमलं भवति हंस इव। यतः

कार्यस्यैक्येऽपि हेतूनामानन्त्यमत्र विद्यते।
विद्यादानं धनं गुप्तमाश्रयः प्रश्रयस्सदा॥

किमपि पठन्तीव सभारम्भवेलायाम्।

श्रृणुमस्तावत् (आकर्णनमभिनीय) किमिति –

गुरुर्विद्या गुरुस्सम्पत् गुरुर्दैवं गुरुर्वरम्।
गुरुः ज्ञानं गुरुः ज्ञेयं गुरुतुल्यं न विद्यते॥
गुरुभुजतरुसंस्थः शिष्यपक्षीन्द्रवर्गः
गुरुमतिगिरिसंस्थः शिष्य जन्त्विन्द्रसङ्घः।
गुरुगतिरलमेका सर्वदेशस्य शान्त्यै
गुरुकृतिरलमेका सर्वभावप्रदीप्त्यै॥

(इति निष्क्रान्तः)

❖❖★❖❖

कविजनमण्डनभाणः

वदत्यशेषं न कारेति लेशं
कवीश्वरो वा परमेश्वरो वा।
शक्त्या यया तां प्रणमामि नित्यं
स्वार्थात्मिकां स्वार्थरतात्मिकाञ्च ॥

अपि च -

नमः कवीशाय सहस्रवर्त्मने
सहस्रसन्मानदिनाभिलाषिणे।
निजप्रशंशैकविलासशालिने
प्रसारितानन्तजनान्तरात्मने।

(नान्द्यन्ते)

सूत्रधारः :- **(प्रविश्य) (इतस्ततः दृष्टिं प्रसार्य)** अरेरे धिङ्मूर्ख! अभावेऽपि सामाजिकानां यवनिका उत्पातिता। तालफलप्रमाणैरक्षरैः सुनिर्दिष्टेऽपि समये न केनाप्यागतं वराकेण। अथवा भारतीयानां सरणिः खल्वियमनारम्भो वा आलस्यारम्भो वा आरब्धपरित्यागो वा।

(विचिन्त्य) अथवा केनापि अन्तश्शत्रुणा प्रकटितं स्यादत्र सभानन्तरं कविसम्मेलनमप्यस्तीति यच्च आगच्छतः अपि सभ्यान् सभिकानिव पलायितान् कर्तुमलम्। अहो! कवीनां दौर्भाग्यम्

भावनास्पन्दनाभावात् सानुभूतेर्विलोपनात्॥
अनाचारोपदेशित्वात् कवीन् निन्दन्ति लौकिकाः॥

(निःश्वस्य) मयापि किं कर्तुं शक्यते? मातुलस्य मम कविता कण्डूतिविनयनार्थं कविसम्मेलमुपाकल्पि। अथवा उलूखले शिरः निक्षिप्य मुसलप्रहारपरिहारचिन्तया अलम्। सामाजिकानामागमनावधि, निरीक्षितव्यं मया शिलालोलुपः शिल्पी इव।अनन्तरमेव अस्माद्गुरुचरणैः सूरं वंशोद्भवैः श्रीनिवासैः विरचितेन कविजनमण्डनाख्येन नूतनभाणेन मयात्रोपस्थातव्यम्। (चिन्तयन्) साम्प्रतं किं कर्तास्मि?

किं सारमेयानपसारयामि
सभागतान् चालितवालहेलान्।
किं सारमेयानपि सारयामि
भावानशेषान् कवितैकगत्या॥

(नेपथ्ये)

अये! क एष मयि स्थिते सारमेयभावग्राही।

सूत्रधारः:-(निशम्य) अहो! आगच्छत्ययं देवानां प्रियः बृहस्पतिनामा महाकविः यस्य च सन्मानैकप्रियस्य यथाकालपरिवर्तितभावस्य बिरुदरन्ध्रान्वेषणमूषिकस्य च दर्शनं श्रेयःकामुकैः दूरतः परिहरणीयम्। तावदहं नेपथ्य एव स्थास्यामि यावदयं रङ्गमण्डपं शून्यीकरिष्यति - **(इति निष्कान्तः)**

इति प्रस्तावना

(ततः प्रविशति बृहस्पतिः)

बृहः:- अये क एष मयि स्थिते सारमेयभावग्राही।

रसा नवास्मद्गृहरक्षितारः गुणाश्च दोषाश्च ममात्मजाताः।
तातादयश्छान्दसभावभाजः सदा प्रिया मे कविता रसघ्ना।

पूर्वेद्युरेव मया विशाखपत्तनतः समागतं यत्र च वेदान्तभवने मम कवितागानं प्राचालि। श्रुत्वा च सर्वे उन्मत्ता अभवन्। सागरतरङ्गाश्च सभावेदिकामधिरुह्य करचालनं कृत्वा न्यवर्तन्त। (निःश्वस्य) मादृशानां महाकवीनां नास्ति विरामः, प्रजासेवां कवितासेवाञ्च परित्यज्य स्थातुम्।

तादृशोऽहं बहुबिरुदभाक् कुहनाविरुद्धवाक्च साम्प्रतं नूतनबिरूदाकांक्षी कविसम्मेलनं प्रति गन्तास्मि। अस्मिंश्च दिने सन्ध्याकाले स्तब्धस्य क्षुब्धस्य लुब्धस्य च कस्यापि पुण्यजनस्य षष्टिपूर्तिमहोत्सवः भविता, तत्राहं प्रधानवक्ता निधानस्वीकर्ता च। तद्यावत् सहस्रकिरणः साहसं न प्रदर्शयति लब्धप्रतिष्ठः कविरिव

तावदहं अन्नपूर्णालये छायं पीत्वा ततो व्रजामि-**(परिक्रम्य विलोक्य)।**

अयमेव अन्नपूर्णालयः कलियुगसुरापानशाला च यस्याश्च अभावे जनानां गृहस्थानां पतिव्रतापत्नीसेवितानामपि चरणवेदना अधरवेदना शिरोवेदना मनोवेदना च। यत्प्रभावेण वराकाः प्रजाः प्रातःकाले प्राणान् वा परित्यजन्ति न तु काफीपानम्। एवं बहुदोषदूषितेऽपि अस्मिन् एको गुणो जागर्ति यत् जातिमतकुलविद्वेषाः एतस्मात् अतिदूरे एव वर्तन्ते।

(पुरोगमनं नटित्वा) अहो महान् प्रमोदः। आयात्येवायं मे पूर्वमित्रं परस्परसहकारप्रणालिकागुरुः अन्योन्यसन्माननीतिशास्त्रवेत्ता च। तत्तस्य परिचयः बिरुदोपचयहेतुरेव। अतः समालापामि **(परिक्रम्य)।**

नमो महद्भयः विरुदभारावनतमस्तकेभ्यः। किं ब्रवीषि 'कुत्र प्रस्थीयत' इति? गच्छामि कविसम्मेलनं प्रति।

(ससम्भ्रमं सम्पश्यन्) अरेरे किमिदं संवृत्तम्। सर्वे अर्धपीतच्छायाः अर्धखादितभक्ष्याश्च मम वचनं श्रुत्वा पलायन्ते। अहो! साम्प्रतं कवीनां स्थितिः पुरातनरक्षकभठस्थितेः प्रतिस्पर्धिनी बभूव। तत्किमेतैः दुष्टजनैः अप्रियम्भावुकैः।

(आकाशे विलोक्य) मित्र! आदिश्यतां सन्माननीतिशास्त्रं शिष्योऽयं चरणयोः प्रणिपत्य पृच्छति

(इति पादाभिवन्दनमभिनयति - आकर्णनमभिनयति) किमुच्यते आर्यैः -

आनेयास्ते स्वमतिलधुकाः कीर्तितकण्डूतिभाजः
सम्मान्याश्च प्रियतमवचो जल्पना कल्पनेन।

आशाः सर्वा अपि परिचिताः भावनीयास्त्वयास्मिन्
नैकोऽपि स्याद्विमत इति ते दुर्मतिर्वापि सोऽस्तु॥

नित्यं सम्मानयान्यं त्वं हीनं दीनं कुसीदकम्।
सोऽपि सम्मानयत्येव त्वां तुल्यभावभाग्जनः॥ इति।

अहो ! कर्णरसायनानि वचनानि। अचिरेणैव कालेन अस्माकं ग्रामे भवत्सम्मान- महोत्सवः बिरुदप्रदान ... **(अर्थोक्तौ विरम्य - आकर्णनमभिनीय)** किमुच्यते आर्यैः। किं मम नीतिशास्त्रं भस्मासुर इव मय्येव प्रयोजयसि इति, शान्तं पापं शान्तं पापं तत्साधयाम्यहम् - **(अन्यतो गत्वा) (विलोक्य)।**

कावत्र द्वौ कलहायमानौ दृश्येते। कलहः खलु कारणं सत्सभा सम्मानराहित्यस्य। तदनयोः निकटमटित्वा कलहकारणं पृच्छामि।

(पुरो व्रजित्वा) भो भो महाशयौ! केशाकेशि नखानखि पुस्तकापुस्तकि लेखिनीलेखिनि किमर्थं संवृत्तं भवतोः ?

(श्रवणमभिनीय) किं वदसि? एषः स्वकवितां श्रावयित्वा मत्कविताश्रवणे विमुखो भवतीति। - हन्त! अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख इति कथितं नावबुध्यते भवता? गच्छतु नामायं वराकः अन्यः कोऽपि तव सन्निधिमायाति, श‍ृणोति, सम्मानयति च

(श्रुत्वा) किमिति, किमिति? उच्चैर्वद... तर्हि भवन्त एव श्रृण्वन्तु इति

(स्वगतम्) अरे महान् प्रमादः आपतितः।कथं वा अस्मादपसरामि, भवतु एवमभिधास्ये **(प्रकाशम्)** मित्र! अवश्यं श्रोतव्यम् किन्त्विदानी कविसम्मेलनाय प्रस्थितोऽस्मि। तत्त्वमपि तत्र आगच्छ। मत्कविताश्रोता एकः वर्तते इति सन्तुष्टो भवामि। कथमयमपि धावति! अहो कवितायाः दुर्विधित्वम्।

कल्याणकारिकविताकलितान्तरङ्गा
वाल्मीकिमुख्यकविभिःपरिभूषिता या।

सा शारदा निरुपमा परिकल्पितारिः
कण्डूतिमात्रपरिपूर्णकवीशसेव्या॥

न जानाति पदार्थं वा पदरूपं पदापदे।
तथापि कविताकाङ्क्षा भारती हन्त रक्ष्यताम्॥

तत् गत्वा ... **(श्रवणमभिनीय)** किमुच्यते भवद्भिः? तत्कुतः प्रथमतः त्वया कविता न परित्यज्यत इति। सम्यगुपलक्षितम्। तानि पदानि, तद्गताश्च भावाः मम हृदयात् बहिर्गताः लोकाय दत्ताः। दत्तस्य पुनः स्वीकृतिः न मे वंशे प्रदृश्यते। तूष्णीं भव त्वं, करोमि त्वां कलाप्रपूर्णम्

(दृष्ट्वा) सन्तुष्टमिवानेन। किमपि वदतीव। किमुच्यते ? बुद्धिहीनस्य मम कथं तत्पदप्राप्तिरिति ? अल्पबुद्धे श्रृणु।

भवादृशेभ्यः अनारब्धकविताकर्मभ्यः बुद्धिहीनेभ्यः अत एव भाषा सहकृद्भ्यः तानि बिरुदपादनि। पश्य अहं पुनः

सकलान् बिरुदान् स्वमतानुमतान्
विकलानपि सत्कविता वलितान्।
करणे पटुता कलितानपि तान्
प्रपदे न वदामि मयैव वृतान्॥

नो चेत्ते साहसं समायाहि मया सह अस्मद्ग्रामम् - तत्र ते कनकाभिषेकं कारयिष्यामि, तवैव द्रव्यव्ययेन।

(विलोक्य) किमयं श्रृण्वन्नेव निर्याति – **(विचिन्त्य)** बिरुदस्वीकारे सर्वे आतुरा एव धनविषये एव तूष्णीं भावः। अथवा को वा स्यात् मूर्खः एतादृशान् स्वधनव्ययेन सम्भावयितुम्।

(अन्यतः परिवृत्य) समीपे खलु अभ्युदयवादिनः सदा सर्वखादिनो मित्रस्य भवनम्। तत्प्रविशामि।

(प्रवेशं नाटयित्वा) सखे! किं करोषि ? (श्रवणमभिनीय) अभ्युदयकवितामाविष्करोमि इति।

(स्वगतम्) नूनमात्माभ्युदयकविता एव **(प्रकाशम्)** अहो पुरः सुराचषकः, करे सिगरेट् दाहः, नयने स्मरतापः, दूरवाण्या पत्रिकाधिपतिना

समालापः, वेदिकासु पुनः हृदयाक्रोशः सुजनाकर्षश्च। एष खल्वभ्युदयः भारतीयैः काम्यते। किमपि वदतीव मित्रम्।

(आकर्णनमभिनीय) अस्मिन् दिने किमेवं प्रलपसि इति। शनैर्वद। मार्गे कोऽपि अस्मद्भक्तः निर्याति। तदर्थमेव एवमालापः तद्गमनानन्तरमहमपि भागभाक् भवामि - **(सुतीक्ष्णं दृष्ट्वा)** निर्गतमनेन मद्भक्तेन अतत्त्वज्ञेन। तत्तावदहमपि सुराधीवरो भवामि -

सुरासुराणां गणने सुरा मे
अभीष्टसङ्कल्पनशक्तियुक्ताः।
अतस्सुरासेवनमेव धर्मः
श्रेयोऽभिकाङ्क्षा यदि चेतसि स्यात्॥

(पानं नटित्वा उत्थाय) अरे विप्लव कविरिव भगवान् अंशुमाली पश्चिमगति-र्भवति। भवतु नाम अहं कविसम्मेलनसभास्थल मेव गच्छामि। **(परिक्रम्यावलोक्य च)** इयमेव कविसम्मेलनसभा बहुविधकविभूषिता तटाक इव शोभते। दृश्यतामग्रतः विप्लववादी यस्य नास्ति करे प्लवः निजजीवनदीं तर्तुं किन्तु विप्लवस्सन् समाजसागरं तर्तुं तारयितुञ्चाभिलषति यस्य च चेष्टाभिः विप्लवसिद्धान्तस्यैव अप्रतिष्ठा जायते - यश्च -

नित्योग्रवादी नियताग्रखादी
जनप्रवादी विजनानुमोदी।
सदा सुधा साधुवचः प्रबाधी
असंशयं स्याद्भुवनप्रमादी॥

तथापि तद्गतां सामाजिकीं स्पृहां विलोक्य नितरां सन्तुष्टः भिषगिव चिकित्सालये। **(अन्यतो विलोक्य)** अयमपरः तिष्ठति समयमन्विष्यन् सामयिकः कविः यश्च गृहे दह्यमाने इङ्गालक्रयार्थी भवति। उपद्रवे समुपस्थिते लेखिनीं तीक्ष्णां करोति, हतेऽपि कोऽपि महाजने स्मृतिगीतिकारचनेन किमपि सम्पादयितुमिच्छति। पश्यन्तु -

यस्यास्ति नव्यकविता वलितान्यबाधा
तद्वाष्पजालपरिषेचनजन्यवर्णा।
यज्जीवने तु सततं सुखमद्विितीयं
यो वा न वेत्ति निजपात्रमनोत्थभावा:॥

अयमन्य: तत्र उत्तरीयचालनविलासेन सर्वान् निरुत्तरान् कारयति।

एष खलु सम्प्रदायवादी अत एव न वा सम्यक् प्रदायी नापि सम्यक्वादी। सर्वे जानन्ति एकास्य कविता जनव्याप्तेति। किन्तु सैव एकास्य कविता इति विषये तु अप्रगल्भ एव लोक:।

एकं विलिख्य कविता शकलं कदापि
हस्ते निधाय नियतं निरतं तमेव।
गायन्स्वभावजनितैस्स्वरतालरागै:
योऽभून्महान् कविरिति प्रथित: प्रकामम्॥

तदस्य समीपोपवेश: अनुचित:। सभारम्भाभावेऽपि अयं स्वकविताकन्यां परायत्तां कर्तुमुत्सहते। गच्छामि सभाध्यक्षं प्रत्येव। भो! भो! कार्य निर्वाहका:! किमागतं सभाध्यक्षै:?

(आकर्णनमभिनीय) किमुच्यते? नहि नहि तत्स्थाने अन्य: कोऽपि सभाध्यक्ष्यं वहत इति। किं तन्नाम ... किम् प्लेटो इति?

(विकम्प्य) अङ्ग किं करोमि? पलायनमंत्रं पठिष्यामि उत हनुमान चालीसं **(पलायनोन्मुख एव विलोक्य)** किंमदभिमुख मेव हसतीव प्लेटो महाशय:। किं वदन्ति?

(श्रुतिमभिनीय) आगच्छेति। अयमहमागच्छामि।

(कम्पन्नेव पुरो गच्छन्) कथमयमपि कक्षत: पत्राणि अवतारयति किमपि शंसतीव?

(दृष्ट्रा निशम्य) किम् श्रूयतामेकं पद्यमिति ...?

(सानन्दं उत्पतन्) प्लेटो महाशयेनापि स्पन्दितं विचलितं रचितं श्रावयितुमुद्युक्तञ्च। किमुत अस्मदादीनां विषये ? भो भो महाकवय:!

एतदारभ्य यथेच्छं विहरन्तु। नास्ति कापि रीतिः, नास्ति कापि नीतिः। ख्यातिरेकैव सम्पादनीया। तदुत्तिष्ठन्तु विश्रृङ्खलाः। एकैव साम्प्रतं कविताश्लोके कविलोके च सिद्धान्तः। लिख-श्रावय-सम्पादय। त्रिपदमिदं सूत्रम्। अङ्गीकुरु अवकाशान् विपुलीकुरु आशाः व्याप्नुहि आशान्तमासान्तञ्च। इयमेव तद्वृत्तिः। कथम्? आरब्धमेव कविसम्मेलनम्। अमहेव प्रथमः कविः पठितुम्। तन्महाशयाः। मदीयकवितामाकर्ण्य सर्वे गच्छन्तु -

ज्वलतु गगनचारी भावभावानुकारी
दिशतु खगविहारी सारसंसारहारी।
हरतु करविकारी घोरकारानुकारी
धनिकनिवहतारी वर्गविद्वेषपारी॥

(स्वगतम्) कथं करतालध्वनिरपि। तत्पुनः पठामि – धनिकनिवहतारी वर्गविद्वेषपारी....

अस्म्यहं धनमत्तानां धनं प्राणविपत्करम्।
लेखिनीभल्लनिष्ठ्यूतैरक्षरैरल्पविप्लवैः॥
मन्दाकिनीपयो दृष्ट्वा दृष्ट्वा तत्र कुशेशयम्।
प्राप्नोति को वा खेदन्नो लोकसंग्रह दृष्टिभाक् ॥
अल्पसंख्याकवर्गाणां श्रेयस्कारी भवाम्यहम्।
तिष्टन्तु सर्वे मार्गेऽस्मिन् अश्रमप्राप्तसम्पदि॥

जयतु त्रिपदं सूत्रम् ... जयतु त्रिपदं सूत्रम् -

(इति निष्क्रान्तः)

❖❖★❖❖

नटसमागमभाणः

लब्ध्वाधिकारिपदवीमसमप्रपाता
मासादिताक्षिकरपादमहोदरस्सन्।
सर्वानुयायिगणविक्लवताविशेष
सङ्कल्पनैकनिपुणो गणनायकोऽव्यात्॥

(नान्द्यन्ते)

(नेपथ्ये)

घट्टे घट्टे धनाकाङ्क्षा घट्टे घट्टे विलम्बिता।
तं तु घट्टं न पश्यामि यत्र निष्कामकर्मता॥

सूत्रधारः :- (सत्वरं सभयञ्च प्रविश्य) अलमलं रे प्रियदेवर! अलमलं विमर्शनेन। आराधनावकाशे आक्रोशेन किं वा फलं लभ्यते। निर्दुष्टेऽपि प्रयोगे निष्कारणदोषं परिकल्प्य धनदानमपि परावर्तयितुं समर्था एते जनाः। (सामाजिकानुद्दिश्य)।

महाजनाः! बालोऽयं न जानाति देशकालव्यवस्थाम्। सर्वान् निरुपयोगं विमृश्य सर्वविरोधी भवति। नास्ति पादग्रहणदृष्टिः नापि च केशग्रहणशक्तिः। सदा ऋजुमार्गे गच्छन् स्वयं क्लेशान् अनुभवति मामनुभावयति च। देवर इति पश्यामि नोचेत् एतादृशं यथार्थ-वादिनं खण्डशः कृत्वा पातयामि। एतद्भयादेवाहं भाग्यनगरमागत्य रङ्गस्थालाभावेऽपि अस्मिन् 'बस्'यान् निस्थाने नाट्यप्रयोग प्रयासमङ्गीचकार। यतः

मठे भूयात् हठं कुर्यादुत्कोचं निस्त्रपः स्पृशेत्।
येन केनाप्युपायेन कर्तव्यं कुक्षिरक्षणम्॥

(नेपथ्ये)

भावुक! क्षम्यतामयं वराकः। नाट्यप्रदर्शनश्रमस्तव अनावश्यक एव। अहमत्रैव कार्यालयस्य पुरःस्थित्वा एतज्जनजीवितगतानेव नाट्यविशेषान् प्रदर्शयापि। नायं कालः भवादृशानाम्। अपसर, अपसर।

सूत्रधारः :- महाशयाः! किमद्य करवाणि। मम निर्दुष्टतायां

भवन्त एव प्रमाणम्। अथवा भाणरचयिता सूरं श्रीनिवासः। तदपसरामि यावदयं मां कराभ्यामुत्क्षिप्य न पातयति।

(इति निष्क्रान्तः)

वराकः :- (प्रविश्य) हं हो निर्गतं भावुकेन अहमहम्भावुकेन। कर्मवादिन एतादृशाः धर्मपरिच्युतिमपि न लक्षयन्ति। बहिरन्तःस्फुरद्रसस्य विद्याधिकारिकार्यालयस्य पुरतः पुनः पात्रान्तरप्रवेशनेन नाट्यप्रयोगवैयर्थ्यं न जानाति बहुवारं प्रबोधितोऽपि। अत्र सर्वे नाट्यप्रयोगदक्षा एव। किन्तु -

कार्यालये नटो द्रष्टा राष्ट्रे कुत्रापि वर्तते।
अहो! नाट्यफलं तेन दूरस्थेनैव साध्यते॥
घट्टे नाट्यं गृहे नाटयं चित्रे! बुद्धौ विलोकने।
उद्योगे वर्तने नाट्यमहो नाट्यमयं जगत्॥

(परिक्रम्य) किमत्रोपविशामि। (विचिन्त्य) मास्तु मास्तु। द्रष्टारः सर्वे मां वेष्टनव्याप्तं मत्वा सानुभूतिं प्रदर्श्य रसानुभूतिमपि लभेरन्। पादद्वयेनैव तिष्ठामि मद्भाग्येन। एतत्कार्यालयसम्बद्धाः बहवो जनाः राष्ट्रे एकपादेनापि अवस्थातुं न शक्नुवन्ति।

(पुरो दृष्ट्वा) अये! आगच्छति मन्दं मन्दं कठोरगर्भिणीव

व्यट्टालिकतैलशकटम् (Double decker-Bus) यत्तु प्रासादाभावेन खिन्नहृदयानां केषाञ्छित् प्रतिदिनं किंचित्कालं तल्लाभामोदं कल्पयति। कोऽत्र अवतीर्य कार्यालयम् अभियाति।

(सम्यक् परिशील्य) अवैमि। अयं खलु विद्यायाः अधिकारी इत्युच्यते। अहं पुनर्जानामि विद्याधिकारीति। यस्तु साधुस्वभावेन गृहे शशः, स्थलाभावेन तैलशकटे मूषिकः, कार्यालये स्वप्रकोष्टे एकान्ते सिंहः सर्वत्र राष्ट्रे तु वृक इति लब्धप्रतिष्ठः। अपि च

कर्तुं कारयितुञ्चैव नालं यस्यास्ति शेमुषी।
करणे न्यूनताभावः कारणे शक्तिहीनता॥

किं गत्वैनं नमस्करोमि।

(विचार्य) अथवा किं नमस्कारवैयर्थ्यकल्पनेन। तत् द्वारपालकं प्रति नमस्करणेऽपि इतोऽप्यधिकतरो लाभः।

(परिक्रम्य) तदहमन्तः प्रविश्य मत्तोऽपि पुरोगतान् भाग्यनगरचङ्क्रमणपरायणान् वृक्षमूलमधितिष्ठतः विलोक्य परामृशामि। **(गमनं नाटयित्वा) (द्वारसमीपे स्थित्वैव)** कथमयं द्वारं नोद्घाटयति। गत्वा पृच्छामि। **(परिक्रम्य)**

मित्र! अन्तः प्रवेष्टव्यम्।उद्धाट्यताम् द्वा:।**(आकर्णनयनमभिनीय)** किमुच्यते कस्त्वमिति? **(स्वगतम्)** अये! महान् प्रमादः आपतितः। महानटानां कार्यालयोद्योगिनां समवाये अहं नटः इति निर्लज्जं कथं समादधामि? यद्भवति तद्भवतु। असत्यपापपङ्क- परिच्छेदः किमर्थम्?

(**प्रकाशम्**) मित्र ! नटोऽस्म्यहम्। एकवारं कार्यालयं द्रष्टुमुपागतः। **(विलोक्य)** मित्र! किमर्थं हससि? किमपि वक्तुकाम इव दृश्यसे। किं वदसि?

(श्रवणं नाटयित्वा) अत्र नटान्तरस्य अवकाशो नास्ति प्रेक्षकाणामेव इति। बाढम् बाढम्। नाहं तादृशो नटः। भवद्भिः स्पर्धाकारी नाहम्। भवतां लाभो भवद्भ्य एव तिष्ठतु। केवलं नटनविशेषान् अध्येतुमागतोऽहम्।

(श्रुतिमभिनीय) किमपि वदन्त इव भवन्तः -

पत्रं पुष्पं फलं तोयं चित्तं वित्तं समर्पय।
महतां दर्शनाकाङ्क्षा स्याद्यदि स्वीयमानसे॥

इति। मनोः श्लोक इति। **(विहस्य)** तेषामभावे? किं वदन्ति (श्रवणमभिनीय) मार्गे एव उपविश्य पश्येति। अहो मूढमनो! कतिवारं त्वं मार्यसे एतादृशैः मनुम्मन्यमानैस्त्वदपत्यैः। केनैवं निर्लज्जिताः संजाताः जनाः।

जीवं नयन्ति भैक्ष्येण समाजे जातियाचकाः।
प्राणान् हरन्ति चान्येषाम् एतादृक्कर्मयाचकाः॥

किं त्यागभावपरायणानां महतां जन्मभूमौ अस्मिन् भारते देशे याचनैकलब्धामोदाः तेनैव चाधिक्यं मन्यमानाः मानवपिपीलिकाः जाताः। अथवा मास्तु पिपिलिकानां पराभूतिः। किं जातिरेव भारतीया याचनपरायणा बभूव।

हिमालयोन्नता जातिः भारतीया पुरातनी।
नम्रा विनम्रा नो भक्त्या किन्तु तृणविलिप्सया॥
तदहं किं कर्तुं शक्नोमि। अत्रैव द्वारि स्थित्वा विलोकयामि।

(पुरो विलोक्य) अयं कोऽपि दृष्टपूर्व इव। (विचिन्त्य) श्रुतिपथमागतम्। अयं राष्ट्रे कस्याः अपि कलाशालायाः प्रांशुपालः प्रतिमासमर्धभागं भाग्यनगरे एव स्थातुकामः। एतत्कलाशाला कार्यालयस्य 'ब्राच्छ आफीस्' अपि भाग्यनगरे वर्तत इव। तादृशानामेव दौर्बल्येन प्रेषणविभागः (Postal Department) प्रतिवर्षं नष्टमेव अभिभवति। किञ्चिदेनं वादयामि **(कतिचित् पदानि गत्वा)** अभिवादये, अपि कुशलिनो भवन्तः?

(श्रवणमभिनीय) किमुच्यते, अधुनैव भाग्यनगरसन्दर्शनेन कुशली एवेति। बाढम् कोऽयमत्र आगमनप्रयासः भवताम्। (आकर्णनं नाटयित्वा) किं वदन्ति, उपकारवेतनाभ्यर्थनपत्राणि नेतुमागतवानिति। अङ्ग! तदर्थमपि भवद्भिः एतावता श्रमेण इयत् दूरमागतन्तव्यं किम्? कथमयं हसतीव।

(श्रवणमभिनीय) किमुच्यते, अयं व्याज एव केवलम्। भाग्यनगरदर्शनं विना एकसप्ताहपर्यन्तमपि न जीवामीति। धन्याः खलु भवन्त **(स्वागतम्)** एतादृशः खलु निरर्थकभाग्यनगर-चङ्क्रमणपरायणाः चिकीर्षूनपि कार्यालयोद्योगिनः कर्तव्यपराङ्मुखान् कुर्वन्ति, यत्कारणेन अत्रागमने अनासक्तानामपि जनानां कार्यसिद्ध्यर्थमागमनम् अपरिहरणीयं

भवति। अत एव एते खलु संवृत्ताः प्रेषकविभागनष्टकारिणः शकटविभागलाभ-वर्धकाश्च।

(पुरो विलोक्य) कथं सर्वे बहिरायन्ति।

(विचिन्त्य) किंभोजनकालः? अहो! एतादृशपुण्यजनकथासंस्मरणेन मया कालोऽपि नालक्षि। पश्यन्तु। सर्वे उद्योगिनः अतृतीयाः यान्ति। ते च द्वितीयाः कार्यार्थिनः। उद्योगिनः भोजयितुं पाययितुञ्च गच्छन्ति। उद्योगिनस्तु बहोः कालात् अप्राप्तान्नपाना इव अनुसरन्ति। भिक्षुकाणां मुखेष्वपि एतादृशी कला लुब्धता वा न दृश्यते। न ते कुक्षयः। किन्तु तटाकाः।

तटाकानाञ्च जात्वस्ति परीवाहस्य कल्पना।
एतादृक्कुक्षिणां भूयो भूयोऽपि परिपूरणम्॥

समेषामप्येतेषां भोजनालयः उपकार्यालयः। यत्र च कार्यालये क्रियमाणानां कार्याणां व्यवहार निर्णयः उत्कोचस्वीकारः च भवति अविदितान्यया गत्या। नटन्ति चैते कार्यालये पतिव्रता इव गतिव्रताः दुर्गतिगताश्च।

अधिकारी वनासक्तः कार्यकृत् वृक्षलोलुपः।
सेवकः पर्णतृप्तश्च कुत्र कर्तव्यपालना॥

(अन्यतो दृष्ट्वा) अत्र कोऽपि परिपूरितोदरः इत एवायाति। तदेनं किञ्चिदिव वादयामि।

(पुरो गत्वा) आर्य, मित्र! नमांसि भूयांसि (श्रुतिमभिनीय) किं वदसि कस्त्वमिति ?

(विहस्य) अहं कर्मसाक्षी। तथापि मास्तु ते भयम्। अहं सर्वकर्मसाक्षी विना भवत्कर्म।

(आकर्णनमभिनीय) किं पृच्छसि अपि दृष्टं त्वयेति ? सौमनस्य! कोस्ति अद्रष्टा। किन्तु सर्वे आत्मानुगुणगुणदर्शने तूष्णींभावं भजन्ते। नाहं

कुत्रापि वदामि। कथने मूर्खो भवाम्यहं समाजे।

(विलोक्य) अयं हसन्मुखः लसन्मुखश्च जातः। अयि भोः! कियति लब्धमस्मिन् दिने?

(परिशील्य) कथमयं समाधानमदत्त्वा हसति?

(पुनः पृच्छति) (**आकर्णनमभिनीय)** किं वदसि? तत्कर्णजन्मरहस्य सदृशमिति। अहो अहो... धन्यता भारतदेशस्य पुराणव्यासस्य च। पुराणपाण्डित्यमप्यस्ति भवताम्। अत एव एतादृशी गतिः। तद्गच्छ? किं मादृशैः संवादनेन। आर्याः किमपि वदन्त इव

(श्रवणं नाटयित्वा) किं कर्म भवताम् इति? अङ्ग! क्षम्यतामयं जनः।अहं नटम्मन्यमानः भवतां पुरतः।गच्छामि तावत् **(गमनं नाटयति)।**

अर्जुने त्यक्तगाण्डीवे क्लिन्ने गीतामृतोद्भवः।
त्यक्त्वापि कर्म न क्लिन्ना एते गीतोद्भवः कथम्॥

साम्प्रतं मध्याह्नत्वात् विना शुल्कमन्तः प्रवेष्टुमस्त्यवकाशः (विलोक्य) कथमयं द्वाररक्षकः घूर्णमानैः क्रोधारुणैः नयनैः मां पश्यति? अहमेव स्यां प्राथमिको मूर्खः धनदानमननुमन्यमानः एतावदवधि निरीक्ष्य प्रवेष्टुम्। अतः स्यादयं क्रुद्धः।

समूहे त्वविनीतानां नीतिमान् नीतिघातुकः।

व्याघ्रसिंहादिसङ्घाते न्यंङ्कुः क्रूरतरो भवेत्। भवतु नाम। किं चिन्तया।

(अन्यतो गत्वा) अयं कः दीन इव वृक्षमूलमधितिष्ठति। तद्गत्वा परामृशामि।

(गमनं नाटयित्वा) अयि सुहृद् ! भाग्यनगरे पदं निक्षिप्यापि दीन इव दृश्यसे किमर्थम्?

(आकर्णनमभिनीय) किं वदसि? आनीतं सर्वं धनमुद्योगिभ्यः निवेदितम्। तत्रापि अधिकारिणे देयं सेवकः स्वीकृत्य तस्मै न ददौ।

अधिकारी पुनः अदत्तमिति कर्म न करोतीति। हन्त! महानयं प्रमादः। उद्विग्नतया किं साध्यते? तद्गत्वा दृढं पृच्छ। किमुच्यते?

(श्रवणमभिनीय) तदपि कृतम् केवलमुद्योगिभिः आगन्तुकैरपि परिहसितो भवितुमिति। हन्त! एतादृशसूक्ष्मधर्माणां समावाये धर्मसूक्ष्मता अनुसरणीया- 'कर्मण्येवाधिकारस्ते' -

वृषो वृषेण संयुध्य हन्ति वत्सतरीं हठात्।
न रक्षिता न वा द्रष्टा नैवास्ति सहभावुकः॥

अहमहमिका प्रतिस्पर्धिनः कार्यार्थिनः अधिकारिणां तदुद्योगिनाञ्च पुरतः श्रृगालानिव कुर्वते। विश्वासस्यापि ते अन्तिमश्वासं जनयितुं समर्थाः

विश्वासो जन्मिनां शक्तिः प्रयान्ति तेन लौकिकाः।
विश्वासरज्जुविच्छेदे मित्रं शत्रुत्वमीयते॥

तदुत्तिष्ठ॥ आयाहि मया सह। यथाशक्ति साहाय्यमाचरामि।

(नाट्येन गत्वा) (दृष्ट्वा) किमत्र कार्यालये बहुषु स्थानेषु शून्यता एव दरीदृश्यते। कुत्र गताः स्युः कर्मकृतः।

(विचिन्त्य, विलोक्य) आं ज्ञातम्। अत्र खल्वेते एकीभूय परिहासवचनैः समाजसेवां कुर्वन्ति। आगन्तुकामाः तद्वालावलम्बिनः इतस्ततो भ्रमन्ति।

निर्दिष्टे समयेऽप्येते नायान्ति न च कुर्वते।

क्रूराश्च कर्मचण्डालाः दारुणाः दग्धजीविताः॥ तत्तेषां निकटमटित्वा एकवारं भरतवाक्य समयं ज्ञास्यामि।

(पुरो गत्वा) अयि भोः मित्र। किं समापितः कर्मकालः उत सर्वेऽपि वेष्टनव्यापृताः, नोचेत् अत्र सर्वेऽपि सङ्घीभूय समाजनग्नचित्रमिव सम्भाषणं किमर्थं कुरुथ? किमुच्यते?

(श्रवणमभिनीय) मैण्ड् युवर् बिजिनेस् (Mind your

business) इति।

(विहस्य) ह ह ह एतद्भावप्रतिपादनार्थं मातृभाषा नालं किम्? आङ्ग्लेयानां पदैस्सह तत्पदार्थोऽपि न स्वीकरणीयः किम् ? अहमपि मैण्ड् युवर् बिजिनेस् इति साम्प्रतमेव वदामि चेत् किमस्ति तव समीपे समाधानम्। भवतु। तूष्णीमेव गच्छामि। किन्तु पुरोवर्तमाना भारतीया जातिः वीचीव उत्पतन्ती समुद्रात् निष्पतन्ती भवादृशानां स्वाध्यायप्रवचनपराङ्मुखानां हृदयानि विस्फोटयन्ती च तूष्णीं न तिष्ठति। तदानीं तदुपद्रवपरिपतितान् युष्मान् न कोऽपि... न कोऽपि सानुभूत्यापि पश्यति। व्रजाम्यहम् मम किमेतेन -

(नेपेथ्ये) रे दग्धावेशिन्! तिष्ठतिष्ठ तत्रैव, न गन्तव्यम्। एवं सर्वैरपि त्रुटित-पुष्पमालापुष्पैरिव पृथक् पृथक् सङ्घर्षणादेव जातिरेवं विधा जाता। तिष्ठ तत्रैव। वद च यथावसरं यथोचितं यथावकाशमहमप्यागच्छामि त्वया सहेति।

(विचिन्त्य) कोऽयं कर्तव्यमदिरास्वादनेन मत्तोऽपि मत्तः। आगच्छ प्रत्यक्षो भव। पुनः किमपि वदसीव **(श्रवणमभिनयति)** किं न दृश्यते एतदुद्योगिपरिपीतरक्तानां राष्ट्रे वर्तमानानामुपाध्यायानां नेत्रेभ्यः स्रवन्ती रक्तधारा? अर्धपूरित जठराः अपि ते स्वश्रमार्जितधने निर्बन्धतया भागदानेन क्षुभितान्तराः कथमाक्रोशन्तीति न जानासि किम्? प्रभुत्वकर्तव्यपरायणा अपि पैतृकधनत्यागशीला इव नटतः एतान् सरीसृपान् सर्वतः प्रसृतविषान् चानुमोदसे किम्? प्रथमदिने प्रतिमासं वेतनाभावे आपणकुक्कुरा इव परिवर्तमानाः जलपतितमक्षिका इव लुठन्तः एते परविषये औदासीन्यं प्रदर्शयन्ति। अनवधिकं विलम्बं कुर्वन्ति। किमेतान् अनुमोदसे? उत्तिष्ठ। मोहं त्यज। दर्शयामः जीवितरीतिम्। अध्यापयामः एतान् वराकान् समसमाजजीवनसूत्राणि।


(भयं नटन्) हं हो कोऽयं विप्लवी इव। अत्र वर्तमाने न केवलं मम नाटकस्य, मम जीवितस्यापि भरतवाक्यं भवत्येव। भवतु। प्रतिदिनं भरतवाक्यपठनेन विरक्त-जीवितस्य मे इदमेव स्यादन्तिम भरतवाक्यम्। राष्ट्रे बहूनां जीवितानां सौभाग्यसम्पादने नान्दी पाठश्च।

(उच्चैः) मित्र उत्तिष्ठ, ये ये धर्मैकरताः स्वाध्यायैकासक्ताः ते सर्वेऽपि अनुयास्यन्ति अस्मान्। गायन्ति चैव भरतवाक्यम् एतस्य कलङ्कितसमाजस्य तद्गतानामविनीतानामपि। स्यादेव अन्तिमनिर्णयः -

वर्धताम् शक्तिराराष्ट्रम् शक्तिः कर्मसु वर्धताम्।
वर्धताम् स्वार्थसंन्यासः पुरे भाग्यैकरूपिणि॥

(निष्क्रान्तः)

सम्पादिका-परिचयः



नाम	- डॉ॰ यम्. के. सुनीता
जन्मतिथिः	- 17.01.1982
पितरौ	- कोदण्डरेड्डि, लीलावती
विद्याभ्यासः	- साहित्याचार्यः (M.A), विद्यावारिधिः (Ph.D), शिक्षाशास्त्री (B.Ed), P.G. Diploma in Yogavijnana
प्रकाशनानि	- षट् शोधपत्राणि,
अनुभवः	- आराद्विद्याध्यापनम्

लोकभाषा-प्रचार-समितिः

सरस्वती विहारः, बरपदा, भद्रक,
ओडिशा-७५६११३

ISBN: 978-81-955641-9-4

9 788195 564194

मूल्यम् : - 125/-